इल्वलाः १ मृगशिरानक्षत्रका उपरिभागस्थताराका (गुजमुजे तारा) ॥—बृहस्पतिः, सुराचार्यः, गोर्पतिः, धिषणः, गुरुः, जीवः, आङ्गिरसः, वाचस्पतिः, चित्रशिखण्डिजः, ६ बृहस्पतिका. ॥—शुक्रः, दैत्यगुरुः, काव्यः उशनाः, भार्गवः, कविः, ६ शुक्रका. ॥ उशनाः सान्तहो ॥—अङ्गारकः, कुजः, भौमः, लोहिताङ्गः, महीसुतः, ५ मङ्गलका. ॥—रौहिणेयः, बुधः, सौम्यः ३ बुधका. ॥ सौरिः, शनैश्चरः, २ शनिका. ॥—तमः, राहुः, स्वर्भानुः, सैंहिकेयः, विधुंतुदः ५ राहुका. ॥ 'मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः' सप्तर्षिका (चित्रशिखण्डि) (संज्ञावाले) का ॥—राशीनामुदयः लग्नम् २ मेषवृषादि १२ लग्नका ॥—मेषवृषादयो १२ राशिका.॥ 'मेषो वृषोऽथ मिथुनं कर्कटः सिंहकन्यके । तुला च वृश्चिको धन्वी मकरः कुम्भमीनकौ' ॥—सूरः, सूर्यः, अर्यमा, आदित्यः, द्वादशात्मा, दिवाकरः, भास्करः, अहस्करः, ब्रध्नः, प्रभाकरः, विभाकरः, भास्वान्, विवस्वान्, सप्ताश्वः, हरिदश्वः,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विभावरीतमस्विन्यौ रजनी यामिनी तमी २२३
तमिस्रा तामसी रात्रिर्ज्यौत्स्नी चन्द्रिकयान्विता २२४
आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी २२५
गणरात्रं निशा बह्वयः प्रदोषो रजनीमुखम् २२६
अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ २२७
स पर्वसंधिः प्रतिपत्पञ्चदश्योर्यदन्तरम् २२८
पक्षान्तौ पञ्चदश्यौ द्वे पौर्णमासी तु पूर्णिमा २२९
कलाहीने सानुमतिः पूर्णे राका निशाकरे २३०
अमावास्या त्वमावस्या दर्शः सूर्येन्दुसंगमः २३१
सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः २३२
उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च २३३
सोपप्लवोपरक्तौ द्वावग्न्युत्पात उपाहितः २३४

रजनी, यामिनी, तमी १२ रात्रिका नाम ॥ तमिस्रा १ अँधेरिया रातको ॥ ज्यौत्स्नी १ उजेलिया रातको ॥ पक्षिणी १ आगामी व्यतीतदिन युक्त रात्रिका ॥ गणरात्रं १ रात्रिसमूहको ॥–प्रदोषः, रजनीमुखम् २ सन्ध्याका ॥–अर्धरात्रः, निशीथः २ मध्यरातका ॥—यामः, प्रहरः २ प्रहरका ॥ पर्व १ प्रतिपदा पूर्णिमाका संधिका ॥ पक्षान्तौ पञ्चदश्यौ २ अमावास्या र पूर्णिमाका ॥—पौर्णमासी, पूर्णिमा, २ पूर्णिमाका. ॥ सैव पूर्णिमा पूर्णे निशाकरे सति १ पूर्ण चन्द्रमा भयेकी पूर्णिमाको राका १ ॥—अमावास्या, अमावस्या, दर्शः, सूर्येन्दुसंगमः ४ कृष्णपक्षकी अमावस्याका. ॥—सा अमावास्या दृष्टेन्दुश्चेत् दृष्ट इन्दुर्यस्यां सा सिनीवाली १ चन्द्रमा देखिने औंसीका. ॥—सैव नष्टेन्दुकला नष्टा इन्दुकला यस्यां सा कुहूः १ चन्द्रमा नदेखिने औंसीका. ॥—उपरागः, ग्रहः २ ॥ सूर्यचन्द्र ग्रहणका नाम ॥–सोपप्लवः, उपरक्तः २ राहुलेग्रासगरेका बेलाका सूर्यचन्द्रका ॥ अग्न्युत्पातः, उपाहितः २ धूमकेतुआदि उत्पातका.॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ २३५
अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला २३६
तास्तु त्रिंशत्क्षणस्ते तु मुहूर्तो द्वादशास्त्रियाम् २३७
ते तु त्रिंशदहोरात्रः पक्षस्ते दश पञ्च च २३८
पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ २३९
द्वौ द्वौ मार्गादिमासौ स्यादृतुस्तैरयनं त्रिभिः २४०
अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः २४१
समरात्रिंदिवे काले विषुवद्विषुवं च तत् २४२
'पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा **
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे' **

एकयोक्त्याऽपृथग्वचनेन पुष्पवन्तौ १ एक वार उच्चारण गरियेका चन्द्रसूर्य दुवैको ।।—निमेषोऽक्षिस्पन्दकालः १ निमेषको ॥ अष्टादश निमेषामिलित्वैका काष्ठा १ काष्ठाको नाम ॥ त्रिंशत्काष्ठा मिलित्वैका कला १ कलाको नाम ॥ ताः कलास्त्रिंशन्मिलित्वैकः क्षणः १ क्षणको नाम ॥ ते क्षणः द्वादश मिलित्वैको मुहुर्तः मुहूर्तको ॥ पुं.,नपुं.मा छ । ते त्रिंशन्मुहूर्ता एकः १ अहोरात्रको नाम ॥ तेऽहोरात्राः पञ्चदशसंख्याका एकः पक्षः १ पक्षको नाम ॥ पक्षो द्विविधः शुक्लः १ शुक्लःपक्षको नाम ॥ कृष्णः १ कृष्णपक्षको नाम ॥ मास १ महिनाको नाम ॥ मार्गादि द्वौ द्वौ मासौ ऋतुः १ ऋतुको नाम ॥ स च हेमन्तादिसंज्ञः । तै ऋतुभिस्त्रिभिरेकम् अयनम् १ अयनको ॥ सूर्यगतिभेदात् तद्द्विविधा—अर्कस्योदग्गतिः, उत्तरायणम् १ उत्तरायणको नाम ॥ दक्षिणगतिस्तु दक्षिणायनम् १ दक्षिणायनको । एवं द्वे अयने एको वत्सरः १ वर्षको ॥—विषुवत्, विषुवम्, समं रात्रिंदिवं यस्मिंस्तस्मिन्काले । तुलासंक्रान्तौ मेषसंक्रान्तौ च दिनरात्री समे भवतस्तस्य कालस्य २ तुलासंक्रान्तिः २ मेषसंक्रान्तिका. ॥—मार्गशीर्षः,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः २४३
पौषे तैषसहस्यौ द्वौ तपा माघेऽथ फाल्गुने २४४
स्यात्तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको मधु २४५
वैशाखे माधवो राधो ज्येष्ठे शुक्रः शुचिस्त्वयम् २४६
आषाढे श्रावणे तु स्यान्नभाः श्रावणिकश्च सः २४७
स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदाः समाः २४८
स्यादाश्विन इषोऽप्याश्वयुजोऽपि स्यात्तु कार्तिके २४९
बाहुलोर्जौ कार्तिकिको हेमन्तः शिशिरोऽस्त्रियाम् २५०
वसन्ते पुष्पसमयः सुरभिर्ग्रीष्म उष्मकः २५१
निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः २५२
स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत्स्त्रियाम् २५३

सहाः । मार्गः, आग्रहायणिकः ४ मुङ्सीरमहिनाका ॥—पौषः, तैषः, सहस्यः ३ पौष महिनाका. ॥—तपाः, माघः २ माघ महिनाका. ॥—फाल्गुनः, तपस्यः, फाल्गुनिकः ३ फाल्गुन महिनाका. ॥—चैत्रः, चैत्रिकः, मधुः ३ चैत्र महिनाका. ॥—वैशाखः, माधवः, राधः ३ वैशाख महिनाका. ॥ ज्येष्ठः, शुक्रः २ ज्येष्ठ महिनाका. ॥—शुचिः, आषाढः २ आषाढ महिनाका. ॥—श्रावणः, नभाः, श्रावणिकः ३ श्रावण महिनाका. ॥—नभस्यः, प्रौष्ठपदः, भाद्रः, भाद्रपदः ४ भाद्र महिनाका. ॥—आश्विनः, इषः, आश्वयुजः, ३ आश्विन महिनाका ॥ कार्तिकः, बाहुलः, ऊर्जः, कार्तिकिकः, ४ कार्तिक महिनाका ॥ —हेमन्त १ हेमन्त ऋतुको ॥—शिशिरः १ शिशिर ऋतुको ॥ यो पुं-नपुंसकलिङ्गमाछ ॥-वसन्तः, पुष्पसमयः, सुरभिः ३ वसन्त ऋतुका. ॥ ग्रीष्मः, उष्मकः, निदाघः, उष्णोपगमः, उष्णः, ऊष्मागमः, तपः, ७ ग्रीष्म ऋतुका. । 'तप' अकारान्तः पुंलिङ्गमाछ।-प्रावृट्, वर्षाः, २ वर्षा ऋतुका ॥ तत्र 'प्रावृट्'

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् २५४
संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः २५५
मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः २५६
दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम् २५७
मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः २५८
संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि २५९
अस्त्री पङ्कं पुमान्पाप्मा पापं किल्बिषकल्मषम् २६०
कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम् २६१
स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः २६२

शब्द षान्तः त्रिलिङ्गमाछ । 'वर्षा' शब्दस्तु स्त्रीलिङ्गो भूम्नि नित्यं बहुवचनान्तः छ । शरत् १ शरद्ऋतुको ॥—इ हेमन्तादि ६ ऋतुको मुङ्सरि पौष हेमन्तः ऋतु यस्तैप्रकारले २ मैनाको १ ऋतु हुन्छन् स्वयं जान्नु ॥ संवत्सरः, वत्सरः, अब्दः, हायनः, शरत्, समाः, इ ६ वर्षका नाम ॥ 'समाः' स्त्रियां बहुत्वे च ॥—पैत्रोऽहोरात्रः मनुष्यका १ महिनाको पितृको १ अहोरात्र हुन्छ ॥—तथा मानुषेण वर्षेण दैवतो देवतानामहोरात्रः मनुष्यका १ वर्षको देवताको १ अहोरात्र हुन्छ ॥—मानुषाणां यत्कृतानि युगचतुष्टयं तद्दैवं युगं ज्ञेयम् । मनुष्यका सत्य त्रेता द्वापर कलि ४ युगको देवताको १ युग हुन्छ ॥ एवं दैवे द्वे युगसहस्रे ब्रह्मणोऽहोरात्रः देवताको २००० युगको ब्रह्माजीको १ अहोरात्र हुन्छ ॥ ये द्वे दैवे युगसहस्रे तौ ॥ देवताका २ हजार युगको मनुष्यका २ कल्प हुन्छन् ॥ दिव्यानां युगानां या एकसप्ततिरेकाधिका सप्ततिस्तत् मन्वन्तरम् देवताका ७१ युगको मनुष्यको १ मन्वन्तर हुन्छ ॥—संवर्तः, प्रलयः । कल्पः, क्षयः, कल्पान्तः, इ ५ प्रलयका नाम ॥-पङ्कम्, पाप्मा, पापम्, किल्बिषम्, कल्मषम्, कलुषम्, वृजिनम्, एनः, अघम्, अंहः, दुरितम्, १२ पापका । यस्मा 'पङ्कम्' स्त्रीलिङ्ग र पुंलिङ्गमाछ । 'पाप्मा' नकारान्तः पुंलिङ्ग । बाकि नपुंसकमा ॥—धर्मम्, पुण्यम्, श्रेयः, सुकृतम्, वृषः, ५ धर्मका ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः २६३
स्यादानन्दथुरानन्दः शर्मसातसुखानि च २६४
श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् २६५
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् २६६
शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च २६७
मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ २६८
प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः २६९
दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः २७०
हेतुर्ना कारणं बीजं निदानं त्वादिकारणम् २७१
क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम् २७२

तत्र 'धर्मः' अस्त्रियां क्लीब-पुंसोः। वृषः पुंसि ॥—मुत्, प्रीतिः, प्रमदः, हर्षः, प्रमोदः, आमोदः, संमदः, आनन्दथुः, आनन्दः, शर्मः, सातम्, सुखम्, १२ हर्षका। तत्र प्रीतिसाहचर्यान्मुदपि स्त्रियां दकारान्तः ॥—श्वःश्रेयसम्, शिवम्, भद्रम्, कल्याणम्, मङ्गलम्, शुभम्, भावुकम्, भविकम्, भव्यम्, कुशलम्, क्षेमम्, शस्तम्, १२ कल्याणका। तत्र 'क्षेमम्' 'शस्तम्' च पुं-नपुंसकयोः। पापपुण्यशब्दा तथा सुखादिशब्दाः श्वः, श्रेयः, शिवभद्रादयः, शस्तान्ता द्रव्ये विशेष्ये वर्तमानास्त्रिषु। यथा—'पापा स्त्री', 'पापः पुमान्' 'पापं कुलम्' इत्यादि जान्नु। मतल्लिका, मचर्चिका, प्रकाण्डम्, उद्धः, तल्लजः ५ असलका। एते तु पञ्च नित्यं द्रव्य एव लिङ्गान्तरेण सामानाधिकरण्येऽपि स्वलिङ्गं न जहाति। यथा—प्रशस्तो ब्राह्मणः-ब्राह्मणमतल्लिका, प्रशस्ता गौः-गोमचर्चिका, गोप्रकाण्डम्, ब्राह्मणोद्धः, कुमारीतल्लजः, इत्यादि जान्नु ॥—अयः शुभावहो विधिः १। शुभोत्पादक दैवको ॥—दैवम्, दिष्टम्, भागधेयम्, भाग्यम्, नियतिः, विधिः, ६ भाग्यका। 'नियतिः' स्त्री.। 'विधिः' पुं० ॥—हेतुः, कारणम्, बीजम्, ३ कारणका। 'हेतुः' ना पुंलिङ्ग छ ॥—आदिकारणम्, निदानम्, २ मुख्य कारणका ॥—क्षेत्रज्ञः, आत्मा, पुरुषः, ३ आत्माका ॥—प्रधानम्, प्रकृतिः,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः २७३
जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः २७४
प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः २७५
जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता २७६
चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः २७७

इति कालवर्गः ॥ ८. अथ धीवर्गः—

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः २७८
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः २७९
धीर्धारणावती मेधा संकल्पः कर्म मानसम् २८०
'अवधानं समाधानं प्रणिधानं तथैव च' ❀❀
चित्ताभोगो मनस्कारश्चर्चा संख्या विचारणा २८१

---

२ सत्त्वादिगुणसाम्यावस्थाकी प्रकृति (माया) का ॥—यः कालिको विशेषः कालकृतो देहादेर्विशेषो यौवनादिः सा अवस्था २ (उमेर) का नाम ॥ सत्त्वम्, रजः, तमः ३ प्रकृतिका धर्म सत्वरजःतमका ॥ तत्र रजस्तमसी सान्ते ॥ जनुः, जननम्, जन्म, जनिः, उत्पत्तिः, उद्भवः, ६ जन्मका ॥—प्राणी, चेतनः, जन्मी, जन्तुः, जन्युः, शरीरी ६ प्राणिका ॥—जातिः, जातम्, सामान्यम्, ३ घटत्वादि ब्राह्मणत्वादि जातिका. ॥—व्यक्तिः, पृथगात्मता, २ घटादि-जातिमान् व्यक्तिका. ॥—चित्तम्, चेतः, हृदयम्, स्वान्तम्, हृत्, मानसम्, मनः, ७ चित्तका ॥—

२७८–३११. बुद्धिः, मनीषा, धिषणाः, धीः, प्रज्ञा, शेमुषी, मतिः, प्रेक्षा, उपलब्धिः, चित्, संवित्, प्रतिपत्, ज्ञप्तिः, चेतना, १४ बुद्धिका ॥—या धारणा-वती धीः सा मेधा १ स्फुर्तिली (फूर्ति) भयेकी बुद्धिका. ॥—यन्मानसं कर्म मनोव्यापारः स संकल्पः १ संकल्पका ॥—चित्ताभोगः, मनस्कारः, २ सुखादिको

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

'विमर्शो भावना चैव वासना च निगद्यते' **
अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः २८२
संदेहद्वापरौ चाथ समौ निर्णयनिश्चयौ २८३
मिथ्यादृष्टिर्नास्तिकता व्यापादो द्रोहचिन्तनम् २८४
समौ सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः २८५
संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः २८६
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः २८७
मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः २८८
मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् २८९
मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम् २९०
रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी २९१

मनसुबाका ॥—चर्चा, संख्या, विचारणा, ३ प्रमाणले अर्थ विचारगर्नाका ॥ अध्याहारः, तर्कः, ऊहः ३ तर्कका. ॥—विचिकित्सा, संशयः, संदेहः, द्वापरः, ४ संशयज्ञानका. ॥—निर्णयः, निश्चयः, २ निश्चयज्ञानका. ॥—मिथ्यादृष्टिः, नास्तिकता, २ परलोकछैन भन्ने नास्तिकपनाका. ॥—व्यापादः, द्रोहचिन्तनम्, २ आर्काका उपरद्रोहचिताउनका. ॥—सिद्धान्तः, राद्धान्तः, २ सिद्धान्तका. ॥—भ्रान्तिः, मिथ्यामतिः, भ्रमः, ३ अयथार्थज्ञान, (भ्रान्ति)का. ॥—संवित्, आगूः, प्रतिज्ञानम्, नियमः, आश्रवः, संश्रवः, अङ्गीकारः, अभ्युपगमः, प्रतिश्रवः, समाधिः, १० प्रतीज्ञाका. ॥—आगूर्वधूवत् ॥—मोक्षविषये या धीर्बुद्धिस्तज्ज्ञानम् १ मुक्तिविषयक ब्रह्मज्ञानको. ॥—मोक्षशास्त्रादन्यत्र शास्त्रे शिल्पे चित्रादौ च धीर्विज्ञानं १ ॥ शिल्पशास्त्रविषयक ज्ञानको. ॥—मुक्तिः, कैवल्यम्, निर्वाणम्, श्रेयः, निःश्रेयसम्, अमृतम्, मोक्षः, अपवर्गः, ८ मोक्षका. ॥—अज्ञानम्, अविद्या, अहंमतिः, ३ अज्ञानका सांसारिक कारणका. ॥—रूपम्, शब्दः, गन्धः, रसः, स्पर्शः, ५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम् २९२
कर्मेन्द्रियं तु पाय्वादि मनोनेत्रादि धीन्द्रियम् २९३
तुवरस्तु कषायोऽस्त्री मधुरो लवणः कटुः २९४
तिक्तोऽम्लश्च रसाः पुंसि तद्वत्सु षडमी त्रिषु २९५
विमर्दोत्थे परिमलो गन्धे जनमनोहरे २९६
आमोदः सोऽतिनिर्हारी वाच्यलिङ्गत्वमागुणात् २९७
समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः २९८
इष्टगन्धः सुगन्धिः स्यादामोदी मुखवासनः २९९
पूतिगन्धिस्तु दुर्गन्धो विस्रं स्यादामगन्धि यत् ३००

चक्षुरादि ५ ज्ञानेन्द्रियका ५ विषयका ॥ गोचरा, इन्द्रियार्था, २ इ पनि विषयनै हुन् ॥–हृषीकम्, विषयि, इन्द्रियम्, ३ चक्षु आदि इन्द्रियका. ॥—पाय्वादि ५ पायूपस्थादि कर्मेन्द्रियका ॥ आदिना वागादि। ('पायूपस्थं पाणि-पादौ वाक् चेतोन्द्रियसंग्रहः। उत्सर्गआनन्दादानगत्यालापाश्च तत्क्रिया, इनका क्रियाका. ॥—मनोनेत्रादि ज्ञानेन्द्रिय ५ का. ॥—आदिना श्रोत्रादि लिनु। ('मनो कर्णस्तथा नेत्रं रसना च त्वचा सह। नासिका चेति षट् तानि धीन्द्रियाणि प्रचक्षते') ज्ञानेन्द्रियका. ॥—तुवरः, कषायः, २ टर्राका ॥ मधुरः, लवणः, कटुः, तिक्तः, अम्लः, ५ गुलिया नूनिला पीरा तीता अमिला ५ का ५ नाम जान्नु ॥ अमी तुवराद्याः षडपि रसमात्रे वर्तमानाः, पुंसि। तद्वत्सु रसवत्सु वर्तमानास्त्रिषु, वाच्यलिङ्गा ॥—विमर्दोत्थे संघर्षणादिनोत्पन्ने जनमनोहरे गन्धे परिमल १ माड्दा आउने सुगन्धको. ॥ आमोद १ मन हरण गर्ने सुगन्धको ॥—इतः परम् आगुणात् 'गुणे शुक्लादयः' (३११) वक्ष्य, माणाद्गुणशब्दात्प्राग्वाच्यलिङ्गत्वमभिधेयानुसारेण त्रिलिङ्गत्वम् त्रिलिङ्ग जान्नु ॥—समाकर्षी, निर्हारी, २ टाढासम्मपुग्ने सुगन्धका. ॥—सुरभिः, घ्राणतर्पणः, इष्टगन्धः, सुगन्धिः, ४ शोभन साधारण गन्धका. ॥—आमोदी,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः ३०१
अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः ३०२
हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु धूसरः ३०३
कृष्णे नीलासितश्यामकालश्यामलमेचकाः ३०४
पीतो गौरो हरिद्राभः पालाशो हरितो हरित् ३०५
लोहितो रोहितो रक्तः शोणः कोकनदच्छविः ३०६
अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः ३०७
श्यावः स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते ३०८
कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ३०९
चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे ३१०

मुखवासनः, २ मुखलाई सुगन्धितगराउने ताम्बुलादि द्रव्यका ॥—पूतिगन्धिः, दुर्गन्धः, २ दुर्गन्धका ॥—यदामगन्धि तद्विस्रम् । १ काँचो सड़ेको दुर्गन्धिको ॥—शुक्लः, शुभ्रः, शुचिः श्वेतः, विशदः. श्येतः, पाण्डरः, अवदातः, सितः, गौरः, [अवलक्षः] वलक्षः, धवलः, अर्जुनः, हरिणः, पाण्डुरः, पाण्डुः, १६ सेतावर्णका. ॥—ईषत्पाण्डुः, धूसरः, २ फिका सेतापहेलाका ॥—कृष्णः, नीलः, असितः, श्यामः, कालः, श्यामलः, मेचकः, ७ काला वर्णका. ॥—पीतः, गौरः, हरिद्राभः, ३ पहेलोवर्णका. ॥—पालाशः, हरितः, हरित्, ३ हरियाका. ॥—लोहितः, रोहितः, रक्तः. ३ रातावर्णका. ॥—यः कोकनदच्छवो रक्तोत्पलाभः स शोणः १ फिकारातको ॥—योऽव्यक्तराग ईषद्रक्तः अरुणः १ अलि अलि राताको ॥ यः श्वेतमिश्रो रक्तः स पाटल १ सेतो मिलेको राताको ॥—श्यावः, कपिशः, २ कालोपहेलाका. ॥—धूम्रः, धूमलः, कृष्णलोहितः, ३ रातोरकालो मिलेका वर्णका. ॥—कडारः, कपिलः, पिङ्गः, पिशङ्गः, कद्रुः, पिङ्गलः, ६ कैला वर्णका. ॥—चित्रम्, किर्मीरः, कल्माषः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति　　३११

इति धीवर्गः ॥　　९. अथ शब्दादिवर्गः

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती　　३१२
व्याहार उक्तिर्लपितं भाषितं वचनं वचः　　३१३
अपभ्रंशोऽपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः　　३१४
तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता　　३१५
श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः　　३१६
स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी　　३१७

शबलः, एतः, कर्बुरः ६ छिर्बिरेका चित्रविचित्रनानाप्रकारका ॥—शुक्लादयो गुणे गुणमात्रे वर्तमानाः पुंसि, यथा—'अस्य पटस्य शुक्लं रूपम्'। तद्वति गुणवति वस्तुनि वर्तमाना गुणिलिङ्गा अभिधेयलिङ्गाः। यथा—'शुक्ला शाटीः' 'शुक्लः पटः, 'शुक्लं वस्त्रम्'। रोहितादीनां स्त्रीत्वे तु—'श्येनी श्येता, रोहिणी रोहिता, लोहिनी लोहिता' इत्यादि जान्नु ॥

३१२–३६२. ब्राह्मी, भारती, भाषा, गीः, वाक्, वाणी, सरस्वती, व्यवहारः, उक्तिः, लपितम्, भाषितम्, वचनम्, वचः, १२ सरस्वतीका र वचनका ॥—अपभ्रष्टः, शब्दः 'गावी, गोणो' इत्याद्यपशब्दः, अपभ्रंश २ अशुद्धशब्दका ॥—शास्त्रे व्याकरणादौ यो वाचकः स शब्द १ शुद्धशब्दको यथा—ओतप्रोततन्तूनां वाचकः पटः इत्यादि जान्नु। तिङ्सुबन्तचयः तिङन्त-सुबन्तपदसमूहः १ वाक्यको। तिङन्तचयो यथा—'पचति भवति'। सुबन्तचयो यथा—'प्रकृतिसिद्धमिदं हि महात्मनाम्' इत्यादि जान्नु—कारकान्विता कारकैः संबद्धा क्रिया वाक्यं १ कारकयुक्तवाक्यको ॥ यथा—'देवदत्त ! गामभिरक्ष शुक्लदण्डेन' इत्यादि जान्नु ॥ श्रुतिः, वेदः, आम्नायः, त्रयी, ४ वेदका ॥ तद्विधिर्वैदिको विधिर्यागादिर्धर्म १ वेदविहितकर्मको ॥ ऋक् १ ऋक्वेदको ॥ साम १ सामवेदको ॥ यजुः १ यजुर्वेदको ॥ वेदा मिलितास्त्रयी १ तिनैवेदलाई भन्दाको

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शिक्षेत्यादि श्रुतेरङ्गमोंकारप्रणवौ समौ ३१८
इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः ३१९
आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ३२०
आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम् ३२१
प्रबन्धकल्पना कथा प्रवह्लिका प्रहेलिका ३२२
स्मृतिस्तु धर्मसंहिता समाहृतिस्तु संग्रहः ३२३
समस्या तु समासार्था किंवदन्ती जनश्रुतिः ३२४

नाम ॥ 'ऋक्'शब्दः, स्त्रीलिङ्गः जान्नु ॥—शिक्षेत्यादि श्रुतेर्वेदस्याङ्ग १ शिक्षा, कल्प, व्याकरण, निरुक्त, ज्योतिष, छन्दः ६ वेदका अङ्गको नाम ॥ शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः । छन्दोविचितिरित्येष षडङ्गो वेद उच्यते ॥ इत्यादि जान्नु ॥—ओंकारः, प्रणवः २ ॐ कारका ॥ इतिहासः, पुरावृत्तम् २ इतिहास महाभारतादिका ॥—उदात्ताद्यास्त्रयः स्वराः ३ स्वरका । ('उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः इत्यादि जान्नु) ॥— आन्वीक्षिकी १ गौतमादिप्रणित तर्कविद्याको ॥ दण्डनीतिः १ बृहस्पतिप्रणित अर्थशास्त्रको ॥ —आख्यायिका, उपलब्धार्था, अनुभूतार्थप्रतिपादकस्य २ अनुभूतार्थप्रतिपादक वासवदत्तादि सच्चा कथाका ॥—यत् पञ्चलक्षणं तत् पुराणम् २ पुराणका ॥ ('सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंश्यानुचरितं चैव पुराणं पञ्चलक्षणम्') ५ लक्षण पुराणका हुन्छन् ॥—प्रबन्धस्य वाक्यविस्तरस्य या कल्पना रचना सा कथा नाटकरामायणादेः प्रबन्धकल्पना कथा २ कल्पितकथाको ॥—प्रवह्लिका, प्रहेलिका २ प्रहेलिका आर्कोले संन्देह गर्ने गरि बोलेका वाक्यको ॥ जस्तै 'पानीयं पातुमिच्छामि त्वत्तः कमललोचने । यदि दास्यसि नेच्छामि नो दास्यसि पिबाम्यहम् ॥' [दास्यसि=दातुमिच्छसि इति व्यक्तोऽर्थः, दास्यसि=दासी+असि इति गूढोऽर्थः] इति ॥—या मन्वादिभिः प्रणीता धर्मसंहिता धर्मबोधार्थे रचिता संहिता सा स्मृतिः १ धर्मशास्त्रको ॥ समाहृतिः, संग्रहः २ संग्रहग्रन्थको नाम ॥—या समासार्था पूरणीयार्था सा समस्या १ ॥ समस्या पूर्तिको नाम ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः ३२५
आख्याह्वे अभिधानं च नामधेयं च नाम च ३२६
हूतिराकारणाह्वानं संहूतिर्बहुभिः कृता ३२७
विवादो व्यवहारः स्यादुपन्यासस्तु वाङ्मुखम् ३२८
उपोद्घात उदाहारः शपनं शपथः पुमान् ३२९
प्रश्नोऽनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे ३३०
मिथ्याभियोगोऽभ्याख्यानमथ मिथ्याभिशंसनम् ३३१
अभिशापः प्रणादस्तु शब्दः स्यादनुरागजः ३३२
यशः कीर्तिः समज्ञा च स्तवः स्तोत्रं स्तुतिर्नुतिः ३३३

यथा—'शतचन्द्रं नभस्थलम्'। तत्पूरणं यथा—'दामोदरकराघातविह्वलीकृतचेतसा। दृष्टं चाणूरमल्लेन' इत्यादि जान्नु ।। किंवदन्ती, जनश्रुतिः २ दुनियाँमा चलेका कुराका नाम ।।—वार्ता, प्रवृत्तिः, वृत्तान्तः, उदन्तः ४ यथास्थित लोकमाचलेका हालखबरका नाम ।।—आह्वयः, आख्या, आह्वा, अभिधानम्, नामधेयम्, नाम ६ नामका ।।—हूतिः, आकारणा, आह्वानम् ३ बोलाउनाका (हपार्नु) का ।।—या बहुभिः कृता हूतिः, सा संहूतिः १ धेरै जनाले १ चोटी बोलाउनाको (हपार्नु) को ।। विवादः, व्यवहारः २ ऋण लिंदादिंदा झगडामुद्दासंबन्धि वादविवादगर्नुका ।। उपन्यासः, वाङ्मुखम्, २ वचनका आरम्भका ।। उपोद्घातः, उदाहारः २ प्रकृतसंबन्धि विचारका ।। —शपनम्, शपथः २ शपथ (किरिया) का ।।—प्रश्नः, अनुयोगः, पृच्छा ३ प्रश्नका ।। प्रतिवाक्यम्, उत्तरम् २ उत्तरका ।। मिथ्याभियोगः, अभ्याख्यानम् १ भूटोबात लगाउनाका ।। 'शतं मे धारयसि' सहेरुपिया मेरो लियेको छस् इत्यादि जान्नु ।।—मिथ्याभिशंसनम्, अभिशापः २ सुरापानादिमिथ्यापापको भूटो अत्तो लगाउनुका ।।—अनुरागजो गुणानुरागोत्थः शब्दः प्रणाद १ प्रेमले बोलेका शब्दको ।।—यशः, कीर्तिः, समज्ञा ३ कीर्तिका ।।—स्तवः, स्तोत्रं,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आम्रेडितं द्विस्त्रिरुक्तमुच्चैर्घुष्टं तु घोषणा ३३४
काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ३३५
अवर्णाक्षेपनिर्वादपरीवादापवादवत् ३३६
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ३३७
पारुष्यमतिवादः स्याद्भर्त्सनं त्वपकारगीः ३३८
यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम् ३३९
तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति ३४०
स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः ३४१
अनुलापो मुहुर्भाषा विलापः परिदेवनम् ३४२

स्तुतिः, नुतिः ४ स्तुतिका नाम ॥—आम्रेडितम् १-२-३ बार दोहऱ्यायेका शब्दको ॥ यथा—सर्पः सर्पः ॥—उच्चैर्घुष्टम्, घोषणा २ उच्चास्वरले चिलयायेका शब्दका ॥ शोकभीतिकामादिभिर्ध्वनेर्यो विकारः सा काकुः १ शोक-डर हर्ष प्रभृतिले भयेका स्वरविकारको ॥—अवर्णः, आक्षेपः, निर्वादः, परीवादः, अपवादः, उपक्रोशः, जुगुप्सा, कुत्सा, निन्दा, गर्हणम् १० निन्दाका ॥ 'अपवादवत्' इति वत्प्रत्ययेनावर्णादीनामुपक्रोशस्य चैकलिङ्गत्वं ज्ञापितम्। उपक्रोशान्ता अवर्णादयः, पुंसि भन्ने तात्पर्य हो ॥—पारुष्यम्, अतिवादः, २ निष्ठुरभाषणका नाम ॥—अपकारगीः अपकारार्थकं भाषणं, तद् भर्त्सनं २ हप्काउनु (झर्पानु) का ॥— कस्यांचित् व्यक्तौ क्रोधपूर्वकं दोषप्रतिपादनं उपालम्भः,१ क्रोध निन्दासहितको गालीको॥ यः सनिन्दो निन्दायुक्त उपालम्भः ५ परिभाषणं २ शिकायतसहित दोषकहनुका ॥—मैथुनं प्रति परस्त्रीपुरुष, संयोगेन निमित्तेन य आक्रोशस्तत्र आक्षारणा १ परपुरुष या परस्त्री गमन संबन्धि दोषलगाउनेको ॥—आभाषणम्, आलापः, २ वातचित गर्नाका ॥ यदनर्थकं वचः स प्रलाप अर्थनबर्थका वचनको ॥—अनुलापः, मुहुर्भाषा, २ बार बार बोल्ने वचनको ॥—विलापः, परिदेवनम्, २ रूँदै अलाप् विलापगर्नुका ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः ३४३
सुप्रलापः सुवचनमपलापस्तु निह्नवः ३४४
'चोद्यमाक्षेपाभियोगौ शापाक्रोशौ दुरेषणा **
अस्त्री चाटु चटु श्लाघा प्रेम्णा मिथ्याविकत्थनम्' **
संदेशवाग्वाचिकं स्याद्वाग्भेदास्तु त्रिषूत्तरे ३४५
रुशती वागकल्याणी स्यात्कल्या तु शुभात्मिका ३४६
अत्यर्थमधुरं सान्त्वं संगतं हृदयंगमम् ३४७
निष्ठुरं परुषं ग्राम्यमश्लीलं सूनृतं प्रिये ३४८
सत्येऽथ संकुलक्लिष्टे परस्परपराहते ३४९
लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम् ३५०

विप्रलापः, विरोधोक्तिः, २ परस्परनमिलेका कुराको ॥—मिथः परस्परमुक्तिप्रत्युक्तियुक्तं यद्भाषणं स संलापः १ परस्पर बोलनाको नाम ॥—सुप्रलापः, सुवचनम्, २ असल वचनका ॥—अपलापः, निह्नवः, २ ढाँटनाका ॥—संदेशवाक्, वाचिकम्, २ दूतादिद्वारा समाचार पठायेका मौखिक संन्देशका ॥—अतः परं वक्ष्यमाणा वाग्भेदाः सम्यगन्ताखिषु । यो भन्दाअगाडी सम्यक्संस्काशब्द त्रिलिङ्गमाछन् जस्तै ॥—रुशन् शब्दः, रुशद्वचनम् । या अकल्याणी वाक् सा रुशती १ अशुभवचनको नाम ॥ या शुभात्मिका वाक् सा कल्या १ शुभ वचनको ॥—यदत्यर्थमतिशयेन मधुरं तत् सान्त्वम् १ साह्रै मीठावचनको नाम ॥ संगतम्, हृदयंगमम्, २ चित्तबुझने वचनका ॥—निष्ठुरम्, परुषम् २ कठोर रूखावचनका नाम ॥—ग्राम्यम्, अश्लीलम्, २ पाखे गँवार बोलीका नाम ॥—यत्प्रियं सत्यं वचनं तत् सूनृतं २ साँचो प्यारो बोलीका ॥ यत्परस्परेण विरुद्धं 'माता मे वन्ध्या' इतिवत् पूर्वापरविरुद्धं संकुलम्, क्लिष्टम्, २ परस्पर न मिलने वचनका नाम ॥ जस्तै 'पश्यत्यचक्षुः स शृणोत्यकर्णः' इत्यादिजान्नु ॥ यल्लुप्तवर्णपदमसंपूर्णोच्चारितं वचस्तत् ग्रस्तं १ वर्णपदलुप्तपारेका

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अम्बूकृतं सनिष्ठीवमबद्धं स्यादनर्थकम् ३५१
अनक्षरमवाच्यं स्यादाहतं तु मृषार्थकम् ३५२
'सोल्लुण्ठनं तु सोत्प्रासं भणितं रतिकूजितम् **
श्राव्यं हृद्यं मनोहारि विस्पष्टं प्रकटोदितम्' **
अथ म्लिष्टमविस्पष्टं वितथं त्वनृतं वचः ३५३
सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति ३५४
शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ३५५
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः ३५६
आरवारावसंरावविरावा अथ मर्मरः ३५७
स्वनिते वस्त्रपर्णानां भूषणानां तु शिञ्जितम् ३५८
निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि ३५९

वचनको ॥-यत्त्वरितोदितं निरस्तं २ छीटावचनका ॥-सनिष्ठीवं लालायुक्तं तत् अम्बूकृतं १ धुकउडायेर बोलेका वचनको ॥-यदनर्थकमर्थशून्यं तदबद्धं स्यात् २ अर्थै नमिलने वचनको ॥—अनक्षरम्, अवाच्यम्, २ बोलन नहुने वचनको ॥ मृषार्थकमत्यन्ताभूतार्थकं तत् आहतं १ साह्रै झूटा वचनको नाम ॥—जस्तै 'एष वन्ध्यासुतो याति खपुष्पकृतशेखरः। मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः ॥' इत्यादि जान्नु ॥ म्लिष्टम्, अविस्पष्टम्, २ अस्पष्ट वचनका नाम ॥-यदनृतं वचः तत् वितथमिति १ असत्य वचनको ॥ सत्यम्, तथ्यम्, ऋतम्, सम्यक्, ४ सत्यवचनका नाम। अमूनि तद्वति सत्यवति त्रिषु। यथा—सत्या स्त्री, सत्यः पुमान्, सत्यं कुलम्, ॥—शब्दः, निनादः, निनदः, ध्वनिः, ध्वानः, रवः, स्वनः, स्वानः, निर्घोषः, निर्ह्रादः, नादः, निस्वानः, निस्वनः, आरवः, आरावः, संरावः, विरावः १७ शब्दका (अवाज) का नाम ॥-वस्त्रपर्णानां स्वनिते शब्दे मर्मरः १ वस्त्र र पातका शब्दको नाम ॥-भूषणानां नपुरादीनां स्वनिते, शिञ्जितं १ गहनाका शब्दको (अवाज) को

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादयः ३६०

कोलाहलः कलकलस्तिरश्चां वाशितं रुतम् ३६१

स्त्री प्रतिश्रुत्प्रतिध्वाने गीतं गानमिमे समे ३६२

इति शब्दादिवर्गः ॥ १०. अथ नाट्यवर्गः

निषादर्षभगान्धारषड्जमध्यमधैवताः ३६३

पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ३६४

काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे ३६५

कलो मन्द्रस्तु गम्भीरे तारोऽत्युच्चैस्त्रयस्त्रिषु ३६६

'नृणामुरसि मध्यस्थो द्वाविंशतिविधो ध्वनिः ❀❀

स मन्द्रः कण्ठमध्यस्थस्तारः शिरसि गीयते' ❀❀

नाम ॥ निक्वाणः, निक्वणः, क्वाणः, क्वणः, क्वणनम्, ७ विणाका शब्दका नाम ॥ प्रादेरुपसर्गात् ये प्रक्वाणः, प्रक्वणः, इत्यादयस्ते वीणाया एव क्वणिते ई २ पनि वीणाकै शब्दका नाम हुन् ॥—कोलाहलः, कलकलः २ कोकोहोलो शब्दका नाम ॥ तिरश्चां पक्षिणां रुतं शब्दः वाशितम् १ पक्षिका अवाजको नाम ॥—प्रतिश्रुत्, प्रतिध्वानः २ प्रतिध्वनिका नाम ॥ गीतम्, गानम् २ गानका नाम ॥

३६३-४३८, निषादः, ऋषभः, गान्धारः, षड्जः, मध्यमः, धैवतः, पञ्चमः, इत्यमी तन्त्रीभ्यः कण्ठेभ्यश्चोत्थिताः इ ७ गवैयाका कण्ठबाट उठेका र बीणाप्रभृतिबाट उठेका शब्दका नाम ॥ तिनमा निषादं नर्दन्ति गजाः, ऋषभं गावः, गान्धारं अजादयः, षड्जं मयूराः, मध्यमं क्रौञ्चाः, धैवतमश्वाः, पञ्चमं कोकिलाः इत्यादि जान्नु ॥—ईषत् कलः काकली ३ सूक्ष्म स्पष्ट स्वरका नाम ॥ मधुरः श्रुतिसुखः, स चासोवस्फुटोऽव्यक्ताक्षरः, एतादृशे ध्वनौ कल १ मीठो अस्पष्ट स्वरको नाम ॥ गम्भीरे ध्वनौ मन्द्र २ गम्भीर शब्दको नाम ॥ अत्युच्चैर्ध्वनौ तार १ अति उच्च स्वरको नाम ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समन्वितलयस्त्वेकतालो वीणा तु वल्लकी ३६७

विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी ३६८

ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् ३६९

वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ३७०

चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ३७१

मृदङ्गा मुरजा भेदास्त्वङ्क्यालिङ्ग्योर्ध्वकास्त्रयः ३७२

स्याद्यशःपटहो ढक्का भेरी स्त्री दुन्दुभिः पुमान् ३७३

त्रयः कलमन्द्रतारास्त्रिषु ३ तीनलिङ्गमा छन् ।।—यः सम्यगन्वितोऽनुगतो लयो गीतादिसाम्यं यत्र स समन्वितलयः, एकताल २ गाउनु बजाउनु नाच्नु ई ३ को तालमिलनुको नाम ।।—वीणा, वल्लकी, विपञ्ची ३ वीणाका नाम ।।—सा वीणा तु सप्तभिस्तन्त्रीभिरुपलक्षिता परिवादिनी ७ तार लागेका वीणाका नाम ।।—यद्वीणादिकं वाद्यं तत् ततं १ वीणा आदि बजाउने बाजाको नाम ।। आदिना सैरन्ध्रीरावणप्रहस्तकिंनर्यादि लिईछन् ।।—यन्मुरजादिकं मृदङ्गादिकं आदिना पटहादि, मुखे चर्मणा बध्यते तदानद्धं मुखमा १ छालालायेर बजाउने मुरज आदि बाजाको नाम ।। —वंशादिकम् । आदिना शङ्खादि । तत्सुषिरं १ वंशी बाँसुरी शङ्ख आदि फुकेर बजाउने सुषिरवाद्यको नाम ।।—यत्कांस्यमयतालादिकं, आदिना घण्टाझल्लर्यादि तद्घनं १ ठोकेर बजाउनु पर्ने साह्रा घण्टा झ्याली इत्यादि घनवाद्यको नाम ।।—इदं ततादिकं चतुर्विधं वाद्यं वादित्रातोद्यनामकं वादित्रमातोद्यं च नाम यस्य तत् पूर्वोक्त ततं, आनद्धं, सुषिरं, घनं, ४ सामान्य बाजाका नाम ।।—मृदङ्गाः, मुरजाः २ मृदङ्गका नाम ।। बहुविधत्वाद्बहुवचनम् ।।—अङ्क्यः, आलिङ्ग्यः, ऊर्ध्वकः ३ मृदङ्गका भेद हुन् हर्राकारवाला अङ्क्यः जौकोमध्यभागजस्तो ऊर्ध्वकः गोपुच्छाकार वाला आलिङ्ग्यः हुन्छन् ।। यशसे य आदौ पटहो वाद्यते स यशःपटहः । स एव ढक्का यशःपटहः, २ नगराका नाम ।।—भेरी, दुन्दुभिः २ कर्नालका नाम ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आनकः पटहोऽस्त्री स्यात्कोणो वीणादिवादनम् ३७४
वीणादण्डः प्रवालः स्यात्ककुभस्तु प्रसेवकः ३७५
कोलम्बकस्तु कायोऽस्या उपनाहो निबन्धनम् ३७६
वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झराः ३७७
मर्दलः पणवोऽन्ये च नर्तकीलासिके समे ३७८
विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ३७९
तालः कालक्रियामानं लयः साम्यमथास्त्रियाम् ३८०
ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने ३८१
तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम् ३८२

आनकः, पटहः २ दमाहाका नाम ॥—वीणादि वाद्यते येन तद्धनुराकृति काष्ठं कोण ॥—वीणादण्डः प्रवालः २ वीणा वजाउने दण्डका नाम ॥—ककुभः, प्रसेवकः २ वीणाका तलतिर छालाले बाँधेका भाण्डका ॥—अस्या वीणायाः कायस्तन्त्रीरहितोदण्डादिसमुदायः कोलम्बकः १ तारनलायेका केवल वीणाको॥ —यत्र वीणाप्रान्ते तन्त्र्यो निबध्यन्ते तन्निबन्धनम्, उपनाहः १ वीणाको तार बाँधने किलाको ॥—डमरुः, मड्डुः, डिण्डिमः, झर्झरः, मर्दलः, पणवः ६ डमरू, ठूलोडमरू, डिव्डिवे, (झाँज) झ्याली, मादल, तम्बुरा क्रमशः ६ का छवटा नाम ॥ हुडुकः, गोमुखः आदिपनिछन्। अन्ये च हुड्डुक-गोमुखादयः सन्ति ॥—नर्तकी, लासिका, २ नाँच्ने स्त्रीका नाम ॥—कर-चरणादिभिर्यद्विलम्बितं नृत्यादिकं तत् तत्त्वं १ (ढीलो) गरियेका नृत्य गीतवाद्यको नाम ॥—यद्द्रुतं शीघ्रं नृत्यादिकं तत् ओघः १ छीटो गरिये-का नृत्यगीत वाद्यको नाम ॥—यन्मध्यं न विलम्बितं नापि द्रुतं तत् घनं १ मध्यम् न ढीलो नछीटो रितले गरियेका नृत्य गीत वाद्यको नाम ॥—कालक्रिययोर्मानं नियमहेतुः ताल १ काल (टायम) २ क्रिया नर्तन गान वादन प्रमाण तालको नाम ॥—गीतवाद्यपादादिन्यासानां क्रियाकालयोः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः ३८३
स्त्रीवेषधारी पुरुषो नाट्योक्तौ गणिकाज्जुका ३८४
भगिनीपतिरावुत्तो भावो विद्वानथावुकः ३८५
जनको युवराजस्तु कुमारो भर्तृदारकः ३८६
राजा भट्टारको देवस्तत्सुता भर्तृदारिका ३८७
देवी कृताभिषेकायामितरासु तु भट्टिनी ३८८
अब्रह्मण्यमवध्योक्तौ राजश्यालस्तु राष्ट्रियः ३८९
अम्बा माताऽथ बाला स्याद्वासूरार्यस्तु मारिषः ३९०

साम्यं लय १ लय नाच गान बाजाहरूको यथोचित मेलको नाम ।।—ताण्डवम्, नटनम्, नाट्यम्, लास्यम्, नृत्यम्, नर्तनम् ६ नाचका नाम ॥—नृत्य-गीत वाद्यमितीदं त्रयं मिलित्वा तौर्यत्रिकं १ नाँच गान वाद्य इन्का समुदायका नाम ।। यः स्त्रीवेषधारी नर्तकः पुरुषस्तत्र भ्रकुंसः, भ्रुकुंसः, भ्रूकुंसः ३ नाँच्नलाई स्त्रीको भेषधारणगर्ने पुरुषका नाम ।। नाट्योक्तौ नाट्यप्रकरणे, नाट्यादन्यत्र प्रयोगो नास्ति अत्र उप्रान्तका अङ्गहारोङ्ग विक्षेप भन्ने श्लोक देखी पैलेका शब्दको प्रयोग प्रायः नाटकमा मात्र गरिन्छ॥ या गणिका सा अज्जुका १ नाँचकी वेश्याको नाम ।।—भगिन्याः पतिः आवुत्त १ भिनाजू या बहिने जुवाईंको नाम ।।—यो विद्वान् स भाव १ विद्वान्‌को नाम ।।—जनकस्तु आवुक १ पिताको नाम ।।—युवराजस्तु कुमारः, भर्तृदारकः २ राजकुमारका नाम ।।—भट्टारकः, देवः २ राजाका नाम ।।—तस्य राज्ञः सुता भर्तृदारिका १ राजकन्याका नाम ।।—कृतोऽभिषेको यस्यास्तस्यां राज्ञ्यां देवी १ पट्टाभिषेकभयेकीरानी (पटरानी) को नाम॥—इतरासु राज्ञीषु भट्टिनी १ अरुरानीको नाम ।।—अवध्यस्य वधानर्हस्य ब्राह्मणादेरुक्तौ दोषोक्तिकरणे अब्रह्मण्यं १ अवध्य ब्राह्मण मारेको दोष लगाउनका नाम ।। दुहाई (गुहाईका) नाम ।।—राज्ञः श्यालो राष्ट्रिय १ राजाका शालाको नाम ।।-अम्बा, माता २ आमाका नाम ।।-बाला, वासूः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अत्तिका भगिनी ज्येष्ठा निष्ठानिर्वहणे समे　३९१
हण्डे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति　३९२
अङ्गहारोऽङ्गविक्षेपो व्यञ्जकाभिनयौ समौ　३९३
निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके　३९४
शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः　३९५
बीभत्सरौद्रौ च रसाः शृङ्गारः शुचिरुज्ज्वलः　३९६
उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा　३९७
कृपा दयाऽनुकम्पा स्यादनुक्रोशोऽप्यथो सहः　३९८
हासो हास्यं च बीभत्सं विकृतं त्रिष्विदं द्वयम्　३९९

---

२ कुमारी (ठिटिका) नाम ॥—आर्यः, मारिषः २ आफुले मान्ने सूत्रधारका पार्श्ववर्तीका नाम ॥—या ज्येष्ठा भगिनी सा अत्तिका १ दीदीको नाम ॥—निष्ठा, निर्वहणम् २ नाटक समाप्ति या पाँचौं सन्धि विशेषका नाम ॥—नीचां प्रत्याह्वाने हण्डे, १ साना दर्जाका स्त्रीलाई बोलाउने संबोधन पदको नाम ॥ चेटीं प्रति आह्वाने हञ्जे, १ केटीलाई बोलाउने संबोधन पदको नाम ॥ सखीं प्रत्याह्वाने हला १ सखीलाई बोलाउने संबोधन पदको नाम ॥ उपरोक्त ३ शब्द अव्ययमा छन् ॥—अङ्गहारः, अङ्गविक्षेपः २ नाँच्दा अँलाहातपाउ इत्यादि चलाउनका नाम ॥—व्यञ्जकः, अभिनयः २ नेत्र हातद्वारा मनको अभिप्राय प्रकटगर्नुका नाम ॥—अङ्गेन निर्वृत्ते निष्पन्ने कर्मणि आङ्गिकम् १ अङ्गका चेष्टा विशेप कटाक्ष आदिको नाम ॥ सत्त्वेनान्तःकरणेन निर्वृत्ते सात्त्विकम् १ सत्वगुणबाट उत्पन्न स्तम्भ स्वेद रोमाञ्च स्वरभङ्ग आदिको नाम ॥ इ २ शब्दपनि ३ लिङ्गी छन् ॥—शृङ्गारः, वीरः, करुणः, अद्भुतः, हास्यः, भयानकः, बीभत्सः, रौद्रः ८ रसका नाम ॥—शृङ्गारः, शुचिः, उज्ज्वलः ३ शृङ्गाररसका नाम ॥—उत्साहवर्धनः, वीरः २ वीररसका नाम ॥—कारुण्यम्, करुणा, घृणा, कृपा, दया, अनुकम्पा, अनुक्रोशः ७ करुणरस (दयाका) नाम ॥ हसः, हासः, हास्यम् ३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवम् ४००
दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ४०१
भयंकरं प्रतिभयं रौद्रं तूग्रममी त्रिषु ४०२
चतुर्दश दरस्त्रासो भीतिर्भीः साध्वसं भयम् ४०३
विकारो मानसो भावोऽनुभावो भावबोधकः ४०४
गर्वोऽभिमानोऽहंकारो मानश्चित्तसमुन्नतिः ४०५
'दर्पोऽवलेपोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः' **
अनादरः परिभवः परीभावस्तिरस्क्रिया ४०६
रीढावमाननावज्ञावहेलनमसूर्क्षणम् ४०७

हास्यरस हँसाईका नाम ॥—बीभत्सम्, विकृतम् २ बीभत्सरस घिन लागने वस्तुका नाम ॥ इदं द्वयं रसे पुंसि रस अर्थमा पुं० रसवान् अर्थमा ३ लिङ्गी छन् ॥—विस्मयः, अद्भुतम्, आश्चर्यम्, चित्रम् ४ अद्भुतरस आश्चर्यका नाम ॥—भैरवम्, दारुणम्, भीषणम्, भीष्मम्, घोरम्, भीमम्, भयानकम्, भयंकरम्, प्रतिभयम्, ९ भयानक रस (डर लाग्ने वस्तु) का नाम ॥—रौद्रम्, उग्रम्, २ रौद्ररस सारै डर-लाग्ने वस्तुका नाम ॥—अमी अद्भुतादय उग्रान्ताश्चतुर्दश शब्दाः रसे पुंसि । तद्वति तु त्रिषु वाच्यलिङ्गाः ई १४ शब्द रसलाई कंहदा पुं० रसवान् लाई कंहदा ३ लिङ्गमा छन् ॥—दरः, त्रासः, भीतिः, भीः, साध्वसम्, भयम्, ६ भय (डरका) नाम ॥—मानसः, मनः संबन्धि विकारो भाव १ मनोविकार रति, हास, शोक इत्यादिको नाम ॥—यो भावबोधकश्चित्तविकारस्य प्रकाशकः कटाक्षादिः सोऽनुभाव १ मनकोविकारलाई पैदागर्ने इत्यादि सूचक रोमाञ्च आदिको नाम ॥—गर्वः, अभिमानः, अहंकारः, ३ अभि-मान घमण्डका नाम ॥—चित्तस्य समुन्नतिः परस्मादुत्कर्षचिन्तनेनौन्नत्यं मान १ अरूभन्दा ठूलोछु भन्नेसंझनु चिन्तोन्नतिको नाम ॥—अनादरः, परिभवः, परीभावः, तिरस्क्रिया, रीढा, अवमानना, अवज्ञा, अवहेलनम्, असूर्क्ष-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा साऽपत्रपाऽन्यतः ४०८
क्षान्तिस्तितिक्षाऽभिध्या तु परस्य विषये स्पृहा ४०९
अक्षान्तिरीर्ष्याऽसूया तु दोषारोपो गुणेष्वपि ४१०
वैरं विरोधो विद्वेषो मन्युशोकौ तु शुक् स्त्रियाम् ४११
पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि ४१२
कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ ४१३
शुचौ तु चरिते शीलमुन्मादश्चित्तविभ्रमः ४१४
प्रेमा ना प्रियता हार्दं प्रेम स्नेहोऽथ दोहदम् ४१५
इच्छा काङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः ४१६
कामोऽभिलापस्तर्षश्च सोऽत्यर्थं लालसा द्वयोः ४१७

णम्, ६ अनादरका नाम ॥—मन्दाक्षम्, ह्रीः, त्रपा, व्रीडा, लज्जा, ५ लज्जा (लाज) का नाम ॥—सा लज्जा, अन्यतः परस्माच्चेत् अपत्रता १ आफूभन्दा ठूलादेखी भयेकालाजको ॥—क्षान्तिः, तितिक्षा, २ अर्काको उन्नतिलाई सहनगर्नुका नाम ॥—परस्य विषये परकीयधने स्पृहा अभिध्या अर्काको धन सम्पत्ति आदिको इच्छागर्नुको नाम ॥—अक्षान्तिः, ईर्ष्या, २ अर्काका सम्पत्तिकोसहन न गर्नुका नाम ॥—गुणेष्वपि दोषारोपः असूया १ गुणी जनमा दोषारोपण गर्नुका नाम ॥—वैरम्, विरोधः, विद्वेषः, ३ वैरभावका नाम ॥—मन्युः, शोकः, शुक्, ३ शोकका नाम ॥—पश्चात्तापः, अनुतापः, विप्रतीसारः, ३ पश्चात्ताप (पछीता) का नाम ॥—कोपः, क्रोधः, अमर्षः, रोषः, प्रतिघः, रुट्, क्रुद्धः, ७ क्रोधका नाम ॥—रुट्-क्रुधौ स्त्रीलिङ्गमाछन् ॥—शुचौ शुद्धे चरित आचरणे शुद्धाचरणः, शीलम् १ असल स्वभाव आचरणका नाम ॥—उन्मादः, चित्तविभ्रमः, २ पागलपना र बहुलाउनुका ॥—प्रेमा, प्रियता, हार्दम्, प्रेम, स्नेहः, ५ प्रेमका नाम ॥—'प्रेमा' पुमान्, स्नेह २ पुंलिङ्ग माछन् ॥—दोहदम्, इच्छा, काङ्क्षा, स्पृहा, ईहा,-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उपाधिर्ना धर्मचिन्ता पुंस्याधिर्मानसी व्यथा ४१८
स्याच्चिन्ता स्मृतिराध्यानमुत्कण्ठोत्कलिके समे ४१९
उत्साहोऽध्यवसायः स्यात्स वीर्यमतिशक्तिभाक् ४२०
कपटोऽस्त्रीव्याजदम्भोपधयश्छद्मकैतवे ४२१
कुसृतिर्निकृतिः शाठ्यं प्रमादोऽनवधानता ४२२
कौतूहलं कौतुकं च कुतुकं च कुतूहलम् ४२३
स्त्रीणां विलासबिब्बोकविभ्रमा ललितं तथा ४२४
हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः ४२५

तृट्, वाञ्छा, लिप्सा, मनोरथः, कामः, अभिलाषः, तर्षः, १२ इच्छाका नाम ॥—स तर्षो महांश्चेत् लालसा १ ठूलो इच्छा (लालच) को नाम ॥ स्त्रीपुंसयोः पु० स्त्री०माछ ॥—उपाधिः, धर्मचिन्ता, २ धर्मसंझना का नाम 'उपाधिः' पु० माछ ॥—आधिः, मानसीव्यथा, २ मनको व्यथा दुःखका नाम ॥—चिन्ता, स्मृतिः, आध्यानम्, ३ स्मरण (संझना) का नाम ॥—उत्कण्ठा, उत्कलिका, २ उत्कण्ठाका (प्रबलइच्छा) का॥—उत्साहः, अध्यवसायः, २ उत्साहका नाम ॥—येन कृत्वा असाध्यसाधनेऽप्युद्यतो भवति, स उत्साहोऽतिशक्तिभाक् वीर्यम् २ अतिशक्ति सहित उत्साहका नाम ॥—कपटः, व्याजः, दम्भः, उपाधिः, छद्म, कैतवम्, कुसृतिः, निकृतिः, शाठ्यम्, ९ छलकपटका नाम ॥—प्रमादः, अनवधानता, २ असावधानि भूलचुक्का नाम ॥—कौतूहलम्, कौतुकम्, कुतुकम्, कुतूहलम्, ४ कौतूक(खेल) तमासा जादू लहड इत्यादि आश्चर्यजनकका नाम ॥—विलासः, बिब्बोकः [बिव्वोकः] विभ्रमः, ललितम्, हेला, लीला, ६ यौवनावस्था की अनुरागिणी भयेकी स्त्री हरूमा हुने विलास * बिब्बोक † विभ्रम ‡ ललित + हेला— लीला ÷ इत्यादि चेष्टाका नाम ॥ विशेष ठुला अमर-कोशको टिपणीमा छन् ॥ स्त्रीणां शृङ्गारभावजाः, शृङ्गाररसमुद्भूताः क्रियाः चेष्टाः हावा १ स्त्री हरूका

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

द्रवकेलिपरीहासाः क्रीडा लीला च नर्म च ४२६
व्याजोऽपदेशो लक्ष्यं च क्रीडा खेला च कूर्दनम् ४२७
घर्मो निदाघः स्वेदः स्यात्प्रलयो नष्टचेष्टता ४२८
अवहित्थाकारगुप्तिः समौ संवेगसंभ्रमौ ४२९
स्यादाच्छुरितकं हासः सोत्प्रासः स मनाक् स्मितम् ४३०
मध्यमः स्याद्विहसितं रोमाञ्चो रोमहर्षणम् ४३१
क्रन्दितं रुदितं क्रुष्टं जृम्भस्तु त्रिषु जृम्भणम् ४३२
विप्रलम्भो विसंवादो रिङ्गणं स्खलनं समे ४३३
स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ४३४

स्वभाववाटै उत्पन्नभयेका चेष्टाको नाम ॥—द्रवः, केलिः, परीहासः, क्रीडा, लीला, नर्म, ६ खेल कूद डट्टाका नाम ॥—व्याजः, अपदेशः, लक्ष्यम्, ३ निहुँ (बहानाका) नाम ॥—क्रीडा, खेला, कूर्दनम्, ३ बाल-लीला खेल कूदका नाम ॥—घर्मः, निदाघः, स्वेदः, ३ पसीनाका ॥—प्रलयः, नष्टचेष्टता, २ मूर्च्छाका ॥—अवहित्था, आकारगुप्तिः, २ आफ्नु अह्नुभार लुकाउनुका ॥—संवेगः, संभ्रमः, २ हर्षादिले कार्यमा हड्वड गर्नुका नाम ॥—सोत्प्रासः आच्छुरितकं २ मनमा केही अभिप्रायलाई लियेर भयेकाहास्यको नाम ॥—स हासो मनागीषच्चेत् स्मितं १ मन्दहास्य उत्तमदर्जाको मुसुमुसु हास्यको नाम ॥—स हासो मध्यमश्चेदनल्पाधिकस्तर्हि विहसितं १ मध्यमदर्जाका हास्यको नाम ॥—रोमाञ्चः, रोमहर्षणम्, २ रोमाञ्च शरीरमा काँढा उम्रनुका नाम ॥—क्रन्दितम्, रुदितम्, क्रुष्टम्, ३ रुनाका नाम ॥—जृम्भः, जृम्भणम्, २ हाईका नाम। जृंभः त्रि.लिं.माछ॥-विप्रलम्भः, विसंवादः, ई २ ठगाई भनेको कुरोपुरानगर्नुका नाम ॥—रिङ्गणम्, स्खलनम्, २ स्वधर्ममार्गवाट प्रतिकूलहुनु चिप्लिनु लड्नुका नाम ॥—निद्रा, शयनम्, स्वापः, स्वप्नः, संवेशः, ५ निद्राका

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तन्द्री प्रमीला भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम् ४३५
अदृष्टिः स्यादसौम्येऽक्ष्णि संसिद्धिप्रकृती त्विमे ४३६
स्वरूपं च स्वभावश्च निसर्गश्चाथ वेपथुः ४३७
कम्पोऽथ क्षण उद्धर्षो मह उद्धव उत्सवः ४३८

इति नाट्यवर्गः ॥ ११. अथ पातालभोगिवर्गः

अधोभुवनपातालं बलिसद्म रसातलम् ४३९
नागलोकोऽथ कुहरं शुषिरं विवरं बिलम् ४४०
छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः ४४१
गर्तावटौ भुवि श्वभ्रे सरन्ध्रे शुषिरं त्रिषु ४४२
अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ४४३
ध्वान्ते गाढेऽन्धतमसं क्षीणेऽवतमसं तमः ४४४

नाम ॥—तन्द्री, प्रमीला, २ निद्राकाआदि र अन्तमा हुने आलस्यका (उङ्नाका) नाम ॥ भ्रकुटिः, भ्रुकुटिः भ्रूकुटिः, ३ क्रोध आदिले आँखा तर्नुका नाम ॥—असौम्येऽक्षिण सरोषे चक्षुषि अदृष्टि १ डरलाग्दा आँखाका नाम ॥—संसिद्धिः, प्रकृतिः, स्वरूपम्, स्वभावः, निसर्गः, ५ स्वभावका नाम ॥—वेपथुः, कम्पः, २ कम्पका नाम ॥—क्षणः, उद्धर्षः, महः, उद्धवः उत्सवः, ५ उत्सवका नाम । महः, अकारान्तछ ॥ इति नाट्यवर्गः ।

४३९–४६०, अधोभुवनम्, पातालम्, बलिसद्म, रसातलम्, नागलोकः ५ पातालका नाम ॥—कुहरम्, शुषिरम्, विवरम्, विलम्, छिद्रम्, निर्व्यथनम्, रोकम्, रन्ध्रम्, श्वभ्रम्, वपा, शुषिः, ११ छिद्र (प्वाल) का नाम ॥—गर्तः, अवटः २ प्वाल परेका वस्तुका (खाडल) का नाम ॥—सरन्ध्रेरन्ध्रयुक्ते वस्तुनि, सुषिरं, १ प्वालपरेका बाँस आदि वस्तुको नाम ॥—अन्धकारः, ध्वान्तम्, तमिस्रम्, तिमिरम्, तमः, ५ अन्धकारका नाम ॥ यो तिनैलिङ्गमाछ ॥—'अंधकारः' नपुंसकपुंलिंगमाछ ॥—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विष्वक् संतमसं नागाः काद्रवेयास्तदीश्वरः ४४५
शेषोऽनन्तो वासुकिस्तु सर्पराजोऽथ गोनसे ४४६
तिलित्सः स्यादजगरे शयुर्वाहस इत्युभौ ४४७
अलगर्दो जलव्यालः समौ राजिलडुण्डुभौ ४४८
मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकञ्चुकः ४४९
सर्पः पृदाकुर्भुजगो भुजंगोऽहिर्भुजंगमः ४५०
आशीविषो विषधरश्चक्री व्यालः सरीसृपः ४५१
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ४५२
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ४५३
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ४५४
'लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा **

गाढे ध्वान्ते सातिशये तमसि अन्धतमसः १ घनान्धकारको नाम ॥—क्षीणे ध्वान्ते अवतमसि १ घटेका अन्धकारको नाम ॥—विष्वक् तमः सर्वं व्यापि ध्वान्तं संतमसम् १ सबैतिरफैलियेका व्यापक अन्धकारको नाम ॥—नागाः, काद्रवेयाः, २ नागका नाम ॥—तदीश्वरो नागानामीशः, शेषः, अनन्तः, २ नागाधिराज शेषनागको नाम ॥—वासुकिः, सर्पराजः २ वासुकिः (नागकाराजाका) नाम ॥—गोनसः, तिलित्सः २ गाईको जस्तो नाकहुने सानुजातिका सर्पविशेषका नाम ॥—अजगरः, शयुः, वाहसः ३ अजिंगरका नाम ॥—अलगर्दः, जलव्यालः २ पानीसाँपका नाम ॥—राजिलः, डुण्डुभः २ विषनहुने दुईमुखे सर्पका नाम ॥—मालुधानः, मातुलाहिः २ साँभे सर्पका नाम ॥—निर्मुक्तः; मुक्तकञ्चुकः २ काँचुली छोडेका सर्पका नाम ॥—सर्पः, पृदाकुः, भुजगः, भुजंगः, अहिः, भुजङ्गमः, आशीविषः, विषधरः, चक्री, व्यालः, सरीसृपः, कुण्डली, गूढपात् , चक्षुःश्रवाः, काकोदरः, फणी, दर्वीकरः, दीर्घपृष्ठः, दन्दशूकः, बिलेशयः, उरगः, पन्नगः,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कुम्भीनसः फणधरो हरिर्भोगधरस्तथा **

अहेः शरीरं भोगः स्यादाशीरप्यहिदंष्ट्रिका' **

त्रिष्वाहेयं विषास्थ्यादि स्फटायां तु फणा द्वयोः ४५५

समौ कञ्चुकनिर्मोकौ क्ष्वेडस्तु गरलं विषम् ४५६

पुंसि क्लीबे च काकोलकालकूटहलाहलाः ४५७

सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ४५८

दारदो वत्सनाभश्च विषभेदा अमी नव ४५९

विषवैद्यो जाङ्गुलिको व्यालग्राह्यहितुण्डिकः ४६०

इति पातालभोगिवर्गः] १२. अथ नरकवर्गः ।

स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम् ४६१

भोगी, जिह्मगः, पवनाशनः २५ साधारणसाँपका नाम ।।—यद्विषास्थ्यादि अहिभवं तत् आहेयं १ सर्पकाशरीरमा भयेका विष हड्डी आदि अवयवको नाम ।।—स्फटा, फणा २ सर्पका फँणाका नाम ।। दुवै स्त्रीलिङ्ग पुंलिङ्गमा छन् ।।—कञ्चुकः, निर्मोकः २ सर्पका काँचुलीका नाम ।।—क्ष्वेडः, गरलम्, विषम् ३ विषका ।।—काकोलः, कालकूटः, हलाहलः, सौराष्ट्रिकः, शौक्लिकेयः, ब्रह्मपुत्रः, प्रदीपनः, दारदः, वत्सनाभः ६ स्थावरविषका ९ भेद छन् विष २ प्रकारका छन् स्थावर विष जङ्गम विष स्थावर विष हिमालयका अगल बगल मा वृक्ष छन् तिनका पात चोप बोक्रो खोटो इत्यादि विष हुन्छ ।।।जङ्गमः वि हुने सर्प बिच्छि अरिंगाल वच्छिउँ वारूलो मौरी बाँध स्याल आदिको हुन्छ स्थावरविष ५५ प्रकारको र जङ्गमविष १६ प्रकारको छ ।। यो आयुर्वेदीय सुश्रु ग्रन्थमा छ ।। विषवैद्यः, जाङ्गुलिकः २ विषको औषधीगर्ने वैद्यको नाम। —व्यालग्राही, अहितुण्डिकः २ सर्पसमातेर नचाउँने गारुडीका नाम। इति पातालभोगीवर्गः ।।

४६१-४६७. नारकः, नरकः, निरयः, दुर्गतिः, ४ नरकका नाम ।।—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तद्भेदास्तपनावीचिमहारौरवरौरवाः ४६२
सङ्घातः कालसूत्रं चेत्याद्याः सत्वास्तु नारकाः ४६३
प्रेता वैतरणी सिन्धुः स्यादलक्ष्मीस्तु निर्ऋतिः ४६४
विष्टिराजूः कारणा तु यातना तीव्रवेदना ४६५
पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम् ४६६
स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत् ४६७

इति नरकवर्गः ॥　१३. अथ वारिवर्गः

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ४६८
उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः ४६९
रत्नाकरो जलनिधिर्यादःपतिरपांपतिः ४७०
तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे ४७१

तपनः, अवीचिः, महारौरवः, रौरवः, संघातः, कालसूत्रम् ६ अनेकप्रकारका नरकमध्ये प्रसिद्ध ६ नरकका नाम ॥ आद्यशब्दात् तामिस्रकुम्भीपाकादयः ॥—नारका नरके भवाः सत्त्वाः प्राणिनः प्रेता १ नरकवासीको नाम ॥—नारकीनदी वैतरणी २ वैतरणी नदीका नाम ॥—नारकयलक्ष्मीरशोभा निर्ऋति १ नरककी अलच्छीनी देवीको नाम ॥—विष्टिः, आजू २ बेगारी झाराका नाम ॥—कारणा, यातना, तीव्रवेदना, ३ नरका ठूलासजाय (दुख) का नाम ॥—पीडा, बाधा, व्यथा, दुःखम्, आमनस्यम्, प्रसूतिजम्, कष्टम्, कृच्छ्रम्, आभीलम्, ९ दुखका नाम ॥—एषां मध्ये यद्दुःखादिकं भेद्यगामि विशेष्यवृत्ति तत्त्रिषु । जस्तै—'सेयं सेवा दुःखा च बहुरूपा', 'सोऽयं दुःखसुतोऽगुणः', 'सर्वं दुःखं विवेकिनः' इत्यादि जान्नु ॥

४६८–५५३, समुद्रः, अब्धिः, अकूपारः, पारावारः, सरित्पतिः, उदन्वान्, उदधिः, सिन्धुः, सरस्वान्, सागरः, अर्णवः, रत्नाकरः, जलनिधिः, यादःपतिः, अपांपतिः १५ समुद्रका नाम ॥—तस्य समुद्रस्य प्रभेदास्तु—क्षीरोदः, लवणोदः,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ४७२
पयः कीलालममृतं जीवनं भुवनं वनम् ४७३
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ४७४
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ४७५
मेघपुष्पं घनरसस्त्रिषु द्वे आप्यमम्मयम् ४७६
भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु ४७७
महत्सूल्लोलकल्लोलौ स्यादावर्तोऽम्भसां भ्रमः ४७८
पृषन्तिबिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम् ४७९
चक्राणि पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः ४८०
कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ४८१

तथापरे दध्युद-घृतोद-सुरोद-इक्षूद-स्वादूदाः क्षीरोदआदि ७ समुद्रका १-१ नाम ॥—आपः, वाः, वारि, सलिलम्, कमलम्, जलम्, पयः, कीलालम्, अमृतम्, जीवनम्, भुवनम्, वनम्, कबन्धम्, उदकम्, पाथः, पुष्करम्, सर्वतोमुखम्, अम्भः, अर्णः, तोयम्, पानीयम्, नीरम्, क्षीरम्, अम्बु, शम्बरम्, मेघपुष्पम्, घनरसः २७ पानीका नाम ॥ तत्र 'आपः' स्त्रियां बहुत्वे च नित्यम् ॥—आप्यम्, अम्मयम् २ पानीबाट बनेका बरफ, सर्वत आदिका नाम ॥ तीनैलिङ्गमा छन् ॥—भङ्गः, तरङ्गः, ऊर्मिः, वीचिः ४ तरङ्गका नाम ॥—उल्लोलः, कल्लोलः २ ठूला तरङ्गका नाम ॥—अम्भसां भ्रमो मण्डलाकारेण भ्रमणम् आवर्तः १ भुँमरीको नाम ॥—पृषन्ति, बिन्दवः, पृषतः, विप्रुषः ४ पानीकाछीटा (विन्दु) का नाम ॥—तत्र 'पृषत्' क्लीवे, 'बिन्दु-पृषतौ' पुंसि, 'विप्रुट्' स्त्री० ॥—चक्राणि, पुटभेदाः, भ्रमाः, जलनिर्गमाः ४ भुँमरीपरेर पानी तलखादिनुका नाम ॥ अन्तका २ नाम भङ्गालाकाहुन् कूलम्, रोधः, तीरम्, प्रतीरम्, तटम् ५ तीरका नाम । 'तटं' त्रिलिङ्गम् ॥—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पारावारे परार्वाची तीरे पात्रं तदन्तरम् ४८२
द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ४८३
तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम् ४८४
निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ ४८५
जलोच्छ्वासाः परीवाहाः कूपकास्तु विदारकाः ४८६
नाव्यं त्रिलिङ्गं नौतार्ये स्त्रियां नौस्तरणिस्तरिः ४८७
उडुपं तु प्लवः कोलः स्रोतोऽम्बुसरणं स्वतः ४८८
आतरस्तरपण्यं स्याद्द्रोणी काष्ठाम्बुवाहिनी ४८९
सांयात्रिकः पोतवणिक् कर्णधारस्तु नाविकः ४९०

परं च अर्वाक् च परार्वाची तीरे क्रमेण पारावारे १ पारी वारी दुवै पट्टिका तीरको नाम ॥ नद्याः परतीरं पारम् । नदीका पारी पट्टिका तीरको नाम ॥ अर्वाक् तीरम् आवारं वारी पट्टिका तीरको नाम ॥—तयो पारावारयोरन्तरं मध्यं पात्रं १ दुई तीरको मौझ (पाट) को नाम ॥—वारिणोऽन्तर्मध्ये यत्तटं तत् द्वीपः, अन्तरीपम्, २ द्वीपः (टापू) का नाम ॥—तोयोत्थितं तोयक्रमेणोत्थं तत् पुलिनं १ भरखर पानीलेछोडेका नदीकातीरप्रदेशको नाम ॥—सैकतम्, सिकतामयम्, २ वालु धेरैभयेका प्रदेशका नाम ॥—निषद्वरः, जम्बालः, पङ्कः, शादः, कर्दमः, ५ हिलाका नाम ॥ 'पङ्कः' पुंनपुंसकयोः पुं. नं. मा छ ॥—जलोच्छ्वासाः, परीवाहाः, २ पानीका निकाशका नाम ॥—कूपकाः, विदारकाः २ पानीका निमित्त वालुमा खनेर बनायेका खाल्डाका नाम ॥—नौतार्ये नावा तारितुमर्हे जलादौ नाव्यम् १ नाउले तर्नयोग्य नदी आदिको नाम ॥—नौः, तरणिः, तरिः ३ नाउका नाम ॥—उडुपम्, प्लवः, कोलः, ३ सानू डुङ्गाका ॥—स्वतो यदम्बुसरणं जलगमनं तत् स्रोतः १ पानीको प्राकृतिक उत्पत्तिस्थानबाट बहावको नाम ॥ आतरः, तरपण्यम्, २ खेवा (नदीतारेको) बनी ॥—काष्ठाम्बुवाहिनी काष्ठमयी जलवाहिनी सा द्रोणी १ पानी राखने काठका डुँडको नाम ॥ सांयात्रिकः,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नियामकाः पोतवाहाः कूपको गुणवृक्षकः ४९१
नौकादण्डः क्षेपणी स्यादरित्रं केनिपातकः ४९२
अभ्रिः स्त्री काष्ठकुद्दालः सेकपात्रं तु सेचनम् ४९३
क्लीबेऽर्धनावं नावोऽर्धेऽतीतनौकेऽतिनु त्रिषु ४९४
त्रिष्वागाधात्प्रसन्नोऽच्छः कलुषोऽनच्छ आविलः ४९५
निम्नं गभीरं गम्भीरमुत्तानं तद्विपर्यये ४९६
अगाधमतलस्पर्शं कैवर्ते दाशधीवरौ ४९७
आनायः पुंसि जालं स्याच्छणसूत्रं पवित्रकम् ४९८

पोतवणिक् २ नाँव या जहाजको व्यापारीका नाम ॥—कर्णधारः, नाविकः, २ पोतवारले खीयाउने माँझीका नाम ॥—नियामकाः, पोतवाहाः २ मगरआदि दुष्ट जन्तुबाट बचाउनलाई जहाजका उच्च भागमा वस्ने कप्तानका नाम ॥—कूपकः, गुणवृक्षकः, २ गुनधरा वर्दमान टाङ्नलाई नाउका माझमा ठड्यायेका काठका नाम ॥—नौकादण्डः, क्षेपणी २ बहनी डाँडाका नाम ॥—अरित्रम्, केनिपातकः २ पतवारीका नाम ॥—अभ्रिः, काष्ठकुद्दालः २ नाउको काई खुरकने काठका कोदालाका नाम ॥—सेकपात्रम्, सेचनम्, २ पानी फ्याकने छालाका थैला या (कठौती) का नाम॥ नावोऽर्धे अर्धनावम् १ नाउँका आधा हिस्साको नाम ॥—अतीतनौके नौकामतीत्य वर्तमाने मनुष्यादौ अतिनु १ नाउचढेर पारी पुगीसकेका मानिसको नाम । त्रिलिङ्गमा छ ॥ अतः परं आगाधात् 'अगाध'शब्दमभिव्याप्य त्रिषु वाच्यलिङ्गाः । यहाँ देखी अगाधसम्मका शब्द त्रिलिङ्गमा छन् ॥—प्रसन्नः अच्छः, २ निर्मलका ॥—कलुषः, अनच्छः, आविलः ३ धमिलाका नाम ॥—निम्नम्, गभीरम्, गम्भीरम्, ३ गहिराका नाम ॥—तद्विपर्यये गम्भीरादिवपरीतस्मिन् उत्तानं १ नगहिराका नाम ॥ अगाधम्, अतलस्पर्शम्, २ अत्यन्त गहिराका नाम ॥—कैवर्तः, दाशः, धीवरः, ३ माझिका नाम ॥ आनायः जालम्, २ जालका नाम ॥—शणसूत्रम्, पवित्रकम्, २ सनपाटका डोरीको

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मत्स्याधानी कुवेणी स्याद्बडिशं मत्स्यवेधनम् ४९९
पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ५००
विसारः शकुली चाथ गडकः शकुलार्भकः ५०१
सहस्रदंष्ट्रः पाठीन उलूपी शिशुकः समौ ५०२
नलमीनश्चिलिचिमः प्रोष्ठी तु शफरी द्वयोः ५०३
क्षुद्राण्डमत्स्यसंघातः पोताधानमथो झषाः ५०४
रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ५०५
तिमिंगिलादयश्चाथ यादांसि जलजन्तवः ५०६
तद्भेदाः शिशुमारोद्रशङ्कवो मकरादयः ५०७

बनायेका जालका नाम ।।—मत्स्याधानी, कुवेणी, २ ढकी माछा हालने भाडाका नाम ।।—बडिशम्, मत्स्यवेधनम्, २ वल्छीका नाम ।।—पृथुरोमा, झषः, मत्स्यः, मीनः, वैसारिणः, अण्डजः, विसारः, शकुली, ८ माछाका नाम ।। —गडकः, शकुलार्भकः, २ गडक माछा विशेषका नाम ।।—सहस्रदंष्ट्रः, पाठीनः, २ धेरै दाँत हुने माछाका नाम ।।—उलूपी, शिशुकः, २ सोंसका नाम ।।—नलमीनः, चिलिचिमः, २ साना जातका झारभयेका ठाउमा हुने माछा विशेषका नाम ।।–प्रोष्ठी, शफरी, २ शहरिया माछाविशेषका नाम ।। —क्षुद्राश्च ते अण्डमत्स्याश्च तेषां संघातः पोताधानम् १ फुलबाट निस्केका सानासाना माछाका समूह सिध्राका बथानको नाम ।।—अथो झषा मत्स्यविशेषाः वक्ष्यन्ते, नतु पर्यायाः । अब माछा विशेषका नाम कहिन्छन् ।। —रोहितः, मद्गुरः, शालः, राजीवः, शकुलः, तिमिः, तिमिंगिलः अनेक प्रकारका माछा मध्ये ई ८ जातका ८ थरी माछा अलग् अलग् रोंहु मोगरा आदि ८ का नाम।। 'आदि' शब्दात् नन्द्यावर्तादि जान्नु ।।—यादांसि, जलजन्तवः, २ जलजन्तुका नाम ।।—शिशुमारः, उद्रः, शङ्कुः, मकरः । 'आदि' शब्दात् जलहस्त्यादि इ ४ जलजन्तु विशेष हुन् आदि पदले जलहस्त्यादि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्यात्कुलीरः कर्कटकः कूर्मे कमठकच्छपौ ५०८
ग्राहोऽवहारो नक्रस्तु कुम्भीरोऽथ महीलता ५०९
गण्डूपदः किञ्चुलको निहाका गोधिका समे ५१०
रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः ५११
CC-0. In Public Domain. Digitization by eGangotri

तद्ग्रन्थो घुटिके गुल्फौ पुमान् पार्ष्णिस्तयोरधः १२१७
जङ्घा तु प्रसृता जानूरुपर्वाष्ठीवदस्त्रियाम् १२१८
सक्थि क्लीबे पुमानूरुस्तत्सन्धिः पुंसि वङ्क्षणः १२१९
गुदं त्वपानं पायुर्ना बस्तिर्नाभेरधो द्वयोः १२२०
कटो ना श्रोणिफलकं कटिः श्रोणिः ककुद्मती १२२१
पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः १२२२
कूपकौ तु नितम्बस्थौ द्वयहीने कुकुन्दरे १२२३
स्त्रियां स्फिचौ कटिप्रोथावुपस्थो वक्ष्यमाणयोः १२२४
भगं योनिर्द्वयोः शिश्नो मेढ्रो मेहनशेफसी १२२५
मुष्कोऽण्डकोशो वृषणः पृष्ठवंशाधरे त्रिकम् १२२६

तद्ग्रन्थो पादस्य पार्श्वस्थौ ग्रन्थिविशेषौ घुटिके, गुल्फौ, २ गोली गाँठाका नाम ॥ घुटिके स्त्रीलिङ्गमा छ ॥—पार्ष्णिः १ कुर्कुचाको नाम ॥—जङ्घा, प्रसृता, २ पिंडौलाका नाम ॥—जानु, ऊरुपर्व, अष्ठीवत्, ३ घुँडाका नाम ॥ अष्ठीवत् शब्द पुं.नपुं.माछ ॥—सक्थि, ऊरुः, २ तिघ्राका नाम ॥—सक्थि, नपुंसकमा छ ॥ ऊरुः पुं.माछ ॥ वङ्क्षणः १ तिघ्राका फेदका जोर्निको नाम ॥— गुदम्, अपानम्, पायुः, ३ गुदद्वारको नाम ॥ पायुः पुंलिङ्गमा छ ॥—बस्तिः १ नाभिदेखि उँधो इन्द्रियदेखी उँभोका स्थानको (मूत्राशय) को नाम ॥—श्रोणिः कटिस्तस्याः फलकं कटः १ भुँडीको नाम पुं. माछ ॥—कटिः, श्रोणिः, ककुद्मती, ३ कटि (कमरको) नाम ॥—नितम्बः, १ कटिपश्चाद्भागको नाम ॥—जघनं १ कटिका अघिल्ला ठाउँको नाम ॥ नितम्बस्थौ पृष्ठवंशादधोभागे विद्यमानौ कूपकौ, गर्तौ, कुकुन्दरे ३ फिलामा पर्ने खाल्डाका नाम ॥— स्फिचौ, कटिप्रोथौ, २ कटिका मासुका नाम ॥ उपस्थः १ भगरलिङ्गको नाम ॥—भगम्, योनिः, २ योनिका नाम ॥—शिश्नः, मेढ्रः, मेहनम्, शेफः, ४ लिङ्गका नाम ॥—मुष्कः, अण्डः-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पिचण्डकुक्षी जठरोदरं तुन्दं स्तनौ कुचौ १२२७
चूचुकं तु कुचाग्रं स्यान्न ना क्रोडं भुजान्तरम् १२२८
उरो वत्सं च वक्षश्च पृष्ठं तु चरमं तनोः १२२९
स्कन्धो भुजशिरोंसोऽस्त्री सन्धी तस्यैव जत्रुणी १२३०
वाहुमूले उभे कक्षौ पार्श्वमस्त्री तयोरधः १२३१
मध्यमं चावलग्नं च मध्योऽस्त्री द्वौ परौ द्वयोः १२३२
भुजबाहू प्रवेष्टो दोः स्यात् कफोणिस्तु कूर्परः १२३३
अस्योपरि प्रगण्डः स्यात् प्रकोष्टस्तस्य चाप्यधः १२३४
मणिबन्धादाकनिष्ठं करस्य करभो बहिः १२३५
पञ्चशाखः शयः पाणिस्तर्जनी स्यात्प्रदेशिनी १२३६

कोशः, वृषणः, ३ अण्डकोशका नाम ॥—पृष्ठवंशाधरे त्रिभिरस्थिभिर्घटितं स्थानं त्रिकं १ कटिदेखितलतिर १ पीठ् २ फिला ३ जंमा ३ ठाउँका जोर्निका स्थानको नाम ॥—पिचण्डः, कुक्षिः, जठरम्, उदरम्, तुन्दम्, ५ पेटका नाम ॥—स्तनः, कुचः, २ स्तनका नाम ॥—चूचुकम्, कुचाग्रम्, स्तनका टुप्पाका नाम ॥—क्रोडम्, भुजान्तरम्, उरः, वत्सम्, वक्षः, ५ छातीका नाम ॥ क्रोड शब्द स्त्री. नपुं.माछ ॥ पृष्ठम् १ पिठिऊँको नाम ॥—स्कन्धः, भुजशिरः, अंसः, ३ कौंधका नाम ॥ स्कन्धसंधी जत्रु २ खगाले हाडका नाम ॥—बाहुमूलं, कक्षः, २ काखि र कुमका नाम ॥—पार्श्वः १ कोखाको नाम ॥-मध्यमम्, अवलग्नम्, मध्यः, ३ कम्मरका नाम ॥ मध्यमादि ३ शब्द पुं. नपुं.मा छन् ॥—भुज-बाहुशब्द स्त्री. पुं.मा छन् ॥—भुजः, बाहुः, प्रवेष्टः, दोः, ४ हातका नाम ॥—कफोणिः, कूर्परः, २ कुहुना (कैनु) का नाम ॥—प्रगण्डः १ पाखुराको नाम ॥—प्रकोष्ठः १ कुहुना र पञ्जाका माझको पाखुराको भागको नाम ॥—मणिबन्धमारभ्य कनिष्ठापर्यन्तं करस्य मांसलो बहिर्भागः करभः १ नाडी देखी लियेर कान्छी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अङ्गुल्यः करशाखाः स्युः पुंस्यङ्गुष्ठः प्रदेशिनी १२३७
मध्यमाऽनामिका चापि कनिष्ठा चेति ताः क्रमात् १२३८
पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् १२३९
प्रादेशतालगोकर्णास्तर्जन्यादियुते तते १२४०
अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः १२४१
पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुलौ ११४२
द्वौ संहतौ संहतलः प्रतलौ वामदक्षिणौ १२४३
पाणिर्निकुब्जः प्रसृतिस्तौ युतावञ्जलिः पुमान् १२४४
प्रकोष्ठे विस्तृतकरे हस्तो मुष्ट्या तु बद्धया १२४५
स रत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना १२४६

अउँलाका टुप्पा सम्म काहत्केलाका धारको नाम ।।—पञ्चशाखः, शयः, पाणिः, ३ हात (पञ्जा) का नाम ।।—तर्जनी, प्रदेशिनी, २ चोर अउँलाका नाम ।। अङ्गुली, करशाखा, २ सामान्य अउँलाका नाम ।।—अङ्गुष्ठः प्रदेशिनी, मध्यमा, अनामिका, कनिष्ठिका, ५ क्रमैले बुढि १ चोर २ माझी ३ साहिली ४ कान्छी ५ अउँलाका नाम ।।—अङ्गुष्ठः पुं. लिं.मा छ पुनर्भवः, कररुहः, नखः, नखरः, ४ नख (नङ्) का नाम ।।—नखरः, नखः, पुं. नपुं. माछन् ।।—तर्जनीसहिताङ्गुष्ठे विस्तृते प्रादेशः १ कुरेतको नाम ।। मध्यमा-सहिताङ्गुष्ठविस्तारे तालः १ बुढी अउँला र माझका अउँला फैलाये र नापेको प्रमाणको नाम ।।—अनामिकायुतेऽङ्गुष्ठे गोकर्णः । अङ्गुष्ठर अनामिकाले नापियेको प्रमाणको नाम ।। कनिष्ठासहितेऽङ्गुष्ठे विस्तृते वितस्तिः द्वादशाङ्गुलः १ वित्ताको नाम ।।—चपेटः, प्रतलः, प्रहस्तः, ३ लबटा (पाँच अउँला सहित्को मिलेर लवटो हुन्छ ।। प्रतलः संहतलः, २ खुला जोरेका २ हत्केलाका नाम ।।—प्रसृतिः १ पसरको नाम ।।—अञ्जलिः १ अँजुलीको नाम ।।—तादृशे प्रकोष्ठे कूर्पराधोभागे हस्तः १ हातप्रमाण २४ अङ्गुलको

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् १२४७
ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु १२४८
कण्ठो गलोऽथ ग्रीवायां शिरोधिः कन्धरेत्यपि १२४९
कम्बुग्रीवा त्रिरेखा साऽवटुर्घाटा कृकाटिका १२५०
वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् १२५१
क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका १२५२
ओष्ठाधरौ तु रदनच्छदौ दशनवाससी १२५३
अधस्ताच्चिवुकं गण्डौ कपोलौ तत्परा हनुः १२५४
रदना दशना दन्ता रदास्तालु तु काकुदम् १२५५

नाम ॥—रत्निः १ मूठे हातको नाम ॥—निष्कनिष्ठेन विस्तृतकनिष्ठेन मुष्टिनोपलक्षितो हस्तः, अरत्निः १ कान्छी अऔँलो खुलापारी मुठीबाँधेर कुहुना देखी कान्छी अऔँलाका टुप्पासम्म नापेको नापको प्रमाणको नाम ॥ तिर्यक् ततयोर्विस्तृतयोः करसहितयोर्बाह्वोरन्तरं व्यामः १ बाहाँ (२ हात तेर्स्याउँदा भयेको लम्बाईको नाम ॥ ऊर्ध्वविस्तृतदोषौ भुजौ पाणी च येन तस्य नुः पुंसो यन्मानं तत्र पौरुषं १ पुरुषा हात ठड्यायेर उभियेका मानिस बराबरको प्रमाणको नाम ॥–त्रिलिङ्गछ ॥ कण्ठः, गलः, २ घाँटीका निल्ने भागका नाम ॥ ग्रीवा, शिरोधिः, कंधरा, ३ घाँटीका नाम ॥—सा ग्रीवा तिसृभी रेखाभिर्विशिष्टा कम्बुग्रीवा १ तिन रेखा हुने घाँटीका नाम ॥—अवटुः, घाटा, कृकाटिका, ३ रुद्रघण्टी र गर्दनका माझमा भयेका खाल्डाका (खोप्रे बुढीका नाम ॥—वक्त्रम् , आस्यम् , वदनम् , तुण्डम् , आननम्, लपनम्, मुखम् , ७ मुखका नाम ॥—घ्राणम्, गन्धवहा, घोणा, नासा, नासिका, ५ नाकका नाम ॥—ओष्ठः, अधरः, रदनच्छदः, दशनवासः, ४ ओठका नाम ॥ —चिबुकं १ चिउँडाको नाम ॥—गण्डः, कपोलः, २ गालाका नाम ॥ —ताभ्यां कपोलाभ्यां परा चिबुकस्याधो हनुः १ गाला देखीतल तिरका

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रसज्ञा रसना जिह्वा प्रान्तावोष्ठस्य सृक्किणी १२५६
ललाटमलिकं गोधिरूर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ १२५७
कूर्चमस्त्री भ्रुवोर्मध्यं तारकाऽक्ष्णः कनीनिका १२५८
लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी १२५९
दृग्दृष्टी चास्रु नेत्राम्बु रोदनं चास्रमश्रु च १२६०
अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने १२६१
कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः १२६२
उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् १२६३
चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः १२६४
तद्वृन्दे कैशिकं कैश्यमलकाश्चूर्णकुन्तला १२६५

हाडको नाम ॥ रदनः, दशनः, दन्तः, रदः, ४ दाँतका नाम ॥—तालु, काकुदम्, २ तालुका नाम ॥—रसज्ञा, रसना, जिह्वा, ३ जिब्राका नाम ॥ प्रान्तावित्योष्ठद्वयस्य वामदक्षिणौ प्रान्तौ सृक्विणी १ ओठका छेउको नाम ॥ —ललाटम्, अलिकम्, गोधिः, ३ निधारका नाम ॥—दृग्भ्यामूर्ध्वभागौ भ्रुवौ १ आँखिभौंको नाम ॥ नासोपरि भ्रुवोर्मध्ये कूर्चः आँखि भौंका माझको नाम ॥ अक्ष्णः कनीनिकामध्यगतकृष्णमण्डलं तारका १ आँखाका नानीको नाम ॥—लोचनम्, नयनम्, नेत्रम्, ईक्षणम्, चक्षुः, अक्षि, दृक्, दृष्टिः, ८ आँखाका नाम ॥—अस्रु, नेत्राम्बु, रोदनम्, अस्रम्, अश्रु, ५ आँशुका नाम ॥—नेत्रयोरन्तौ अपाङ्गौ १ नेत्रका छेउको नाम ॥—अपाङ्गेन दर्शने चेष्टायः सः कटाक्षः १ आँखाकाछेउले हेर्नाका नाम ॥—कर्णः, शब्दग्रहः, श्रोत्रम्, श्रुतिः, श्रवणम्, श्रवः, ६ कानका नाम ॥ श्रुतिः स्त्रीलिङ्गछ ॥—उत्तमाङ्गम्, शिरः, शीर्षम्, मूर्धा, मस्तकः, ५ शिरका नाम ॥—मूर्धा पुं० लिङ्गछ ॥ मस्तकः, पुं० नपुं.माछ ॥—चिकुरः, कुन्तलः, वालः, कचः, केशः, शिरोरुहः, ६ कपालका केश (रउँका) नाम ॥—कैशिकम्, कैश्यम्, २

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ते ललाटे भ्रमरकाः काकपक्षः शिखण्डकः १२६६
कबरी केशवेशोऽथ धम्मिल्लः संयताः कचाः १२६७
शिखा चूडा केशपाशी व्रतिनस्तु सटा जटा १२६८
वेणिः प्रवेणी शीर्षण्यशिरस्यौ विशदे कचे १२६९
पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे १२७०
तनूरुहं रोम लोम तद्वृद्धौ श्मश्रु पुंमुखे १२७१
आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम् १२७२
दशैते त्रिष्वलंकर्ताऽलंकरिष्णुश्च मण्डितः १२७३
प्रसाधितोऽलंकृतश्च भूषितश्च परिष्कृतः १२७४
विभ्राड भ्राजिष्णुरोचिष्णू भूषणं स्यादलंक्रिया १२७५
अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम् १२७६

केशसमूहका नाम ॥—अलकाः, चूर्णकुन्तलाः, २ अलकका नाम ॥—ते अलकाः ललाटे लम्बमाना भ्रमरकाः १ निधारमा झुण्डियेका अलकको नाम ॥—काकपक्षः, शिखण्डकः, २ बालकका चूडाकरणदेखी पैलेका जुल्फीका नाम ॥—कबरी, केशवेशः, २ चुल्ठाका नाम ॥ कबरी स्त्रीलिङ्ग छ ॥ संयता बद्धाः कचाः केशसमूहो धम्मिल्लः १ जुरो (खोप) को नाम ॥—शिखा, चूडा, केशपाशी, ३ कपालका माझका केश (शिखा) का नाम ॥—सटा, जटा, २ ब्रह्मचारी हेरूका जठाका नाम ॥—वेणिः, प्रवेणी, २ सर्पको आकार पारेर बाटेका चुल्ठाका नाम ॥—शीर्षण्यः, शिरस्यः २ निर्मल राम्रा केशका नाम ॥ रोमवाचक शब्द देखी परतिरपाश, पक्ष, हस्तः ई ३ शब्दको प्रयोग गर्दा केशसमूह भन्ने अर्थ हुन्छ जस्तै कच-पाशः, केशपक्षः, कुन्तलहस्तः, इत्यादि ॥—तनूरुहम्, रोम, लोम, ३ सामान्य रौंका नाम ॥—श्मश्रु १ दाह्रीजुँगाको नाम ॥—आकल्पः, वेषः, नेपथ्यम्, प्रतिकर्म, प्रसाधनम्, ५ शृङ्गारका नाम ॥ अलंकर्त्रादि दश शब्द विशेष्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मण्डनं चाथ मुकुटं किरीटं पुंनपुंसकम् १२७७
चूडामणिः शिरोरत्नं तरलो हारमध्यगः १२७८
वालपाश्या पारितथ्या पत्रपाश्या ललाटिका १२७९
कर्णिका तालपत्रं स्यात् कुण्डलं कर्णवेष्टनम् १२८०
ग्रैवेयकं कण्ठभूषा लम्बनं स्याल्ललन्तिका १२८१
स्वर्णैः प्रालम्बिकाऽथोरःसूत्रिका मौक्तिकैः कृता १२८२
हारो मुक्तावली देवच्छन्दोऽसौ शतयष्टिका १२८३

का अधीन तथा त्रिलिङ्गमा छन् ।।—अलंकर्ता, अलंकरिष्णुः, २ शृङ्गार गर्नेका नाम ।।—मण्डितः, प्रसाधितः, अलंकृतः, भूषितः, परिष्कृतः, ५ शृङ्गार गरियेका (सिंगारियेकाका) नाम ।।—विभ्राट्, भ्राजिष्णुः, रोचिष्णुः, ३ शृङ्गारका प्रभाले अतिशय बढेका शोभाका नाम ।।—भूषणम्, अलंक्रिया २ गहनाका प्रभावले भयेका शोभाका नाम ।।—अलंकारः, आभरणम्, परिष्कारः, विभूषणम्, मण्डनम्, ५ सामान्य गहनाका नाम ।।—मुकुटम्, किरीटम्, २ मुकुटका नाम ।।—किरीटं पुं. नपुं.मा छन् ।।—चूडामणिः, शिरोरत्नम्, २ शिरमा लाउने रत्न स्टारका नाम ।। हारमध्यगतो नायकमणिः तरलः १ हारका बीचका मणिको नाम ।।—वालपाश्या, पारितथ्या २ चुल्ठामा लाउने फूलका नाम ।।—पत्रपाश्या, ललाटिका, २ निधारमा लाउने पत्ति टीका आदिका नाम ।।—कर्णिका, तालपत्रम्, २ कानमा लाउने गहना विशेषका नाम ।।—कुण्डलम्, कर्णवेष्टनम्, २ कुण्डल (चौगडीका) नाम ।।—ग्रैवेयकम्, कण्ठभूषा, २ घाँटीमा लाउने गहना-का नाम ।।—लम्बनम्, ललन्तिका, २ नाभिसम्म पुग्ने झुण्डिने घाँटीको गहना (तिलहरी) का नाम ।। प्रालम्बिका १ नाभिसम्म पुग्ने सुनको गहनाका नाम ।।—सैव ललन्तिका मौक्तिकै रचिता चेत् उरःसूत्रिका १ नाभिसम्म पुग्ने मोतिका मालाको नाम ।।—हारः, मुक्तावली, २ मोतिका

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

हारभेदा यष्टिभेदाद्गुच्छगुच्छार्धगोस्तनाः १२८४
अर्धहारो माणवक एकावल्येकयष्टिका १२८५
सैव नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिकैः ११८६
आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम् १२८७
केयूरमङ्गदं तुल्ये अङ्गुलीयकमूर्मिका ११८८
साऽक्षराङ्गुलिमुद्रा स्यात् कङ्कणं करभूषणम् १२८९
स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा १२९०
क्लीबे सारसनं चाथ पुंस्कट्यां शृङ्खलं त्रिषु १२९१
पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् १२९२
हंसकः पादकटकः किङ्किणी क्षुद्रघण्टिका १२९३

हारको नाम ॥—अथो मुक्तावली शतयष्टिका शतलतिका चेत् देवच्छन्दः, १- १०० लुङ् हुने मोतिकाहारको नाम ॥-गुच्छः, गुच्छार्धः, गोस्तनः,अर्धहारः, माणवकः, एकावली, एकयष्टिका ७।३२ लुङे मोतिका हारको १ चौविश लुङे मोतिका हारको २ चार लुङे मोतिको ३ वाह्रलुङे मोतिकाहारको ४ विश लुङे हारको ५ एक लुङे हारको ६ शत्ताइस लुङे ठूला ठूला मोतिले बनेको १ लुङे हारको ७ क्रमैछे ७ का ७ नाम जान्नु ॥ सैव सप्तविंशतिमौक्तिकैः कृता नक्षत्रमाला १ नक्षत्र मालाको नाम ॥—आवापकः, पारिहार्यः, कटकः, वलयः, ४ चुराका नाम ॥—केयूरम्, अङ्गदम्, २ बाजूका नाम ॥—अङ्गुलीयकम्, ऊर्मिका, २ अउँठीको नाम ॥—ऊर्मिकैव रामनामाद्यक्षरयुता चेदङ्गुलिमुद्रा १ राम नामादिले छापेका छापे अउँठीको नाम ॥—कङ्कणम्, करभूषणम्, २ कंकन (चुरा) का नाम ॥—मेखला, काञ्ची, सप्तकी, रशना, सारसनम्, ५ स्त्रीका कमरमा लाउने सुन चादिको गहना कर्दनी पेटीका नाम ॥ शृङ्खलं १ पुरुषले लगाउने कमरको सिक्रीको नाम ॥-पादाङ्गदम्, तुलाकोटिः, मञ्जीरः, नूपुरः, ४ पाउजेबका नाम ॥—हंसकः, पादकटकः, २

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

त्वक्फलकृमिरोमाणि वस्त्रयोनिर्दश त्रिषु १२९४
वाल्कं क्षौमादि फालं तु कार्पासं बादरं च तत् १२९५
कौशेयं कृमिकोशोत्थं राङ्कवं मृगरोमजम् १२९६
अनाहतं निष्प्रवाणि तन्त्रकं च नवाम्बरम् १२९७
तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् १२९८
पत्त्रोर्णं धौतकौशेयं बहुमूल्यं महाधनम् १२९९
क्षौमं दुकूलं स्याद्द्वे तु निवीतं प्रावृतं त्रिषु १३००
स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वस्तयोर्द्वयोः १३०१
दैर्घ्यमायाम आरोहः परिणाहो विशालता १३०२

कल्लीका नाम ॥—तुलाकोटिः स्त्रीलिङ्गमाछ ॥ मञ्जीरः पुं. नपुं.माछ ॥ किङ्किणी, क्षुद्रघण्टिका, २ घुँगुराका नाम ॥—त्वक्, फलम्, कृमि, रोम, ४ लुगा बुन्न हुने धागो आउने बोक्रा-फल-किमि रउँ ई ४ का ४ नाम ॥—वाल्कफालादि १० त्रिलिङ्गमा छन ॥—वाल्कम्, क्षौम, फालम्, कार्पासम्, बादरम्, कौशेयम्, राङ्कवम्, ७ वाल्क, क्षौम, २ तिसीवट केश वाट वनेका वस्त्रका २ फालं, कार्पासं वादरम् ३ कपास आदि फल वाट वनेका वस्त्रका । कौशेयम् १ रेशमदिनेमाकुरा जस्ता किरालेदियेकाधागाले वनेका रेश्मी वस्त्रको॥ राङ्कवम् १ भेडा प्रभृतिका रँउले वनेका उनीवस्त्रको नाम क्रमैलेजान्नु ॥—अनाहतम्, निष्प्रवाणि, तन्त्रकम्, नवाम्बरम्, ४ भर्खरतान वाट उतारेका नवीनवस्त्रका नाम । धौतयोर्वस्त्रयोर्युगं यस्तदुद्गमनीयं १ धोयेका जोडी वस्त्रको । धौतकौशेयम् पत्त्रोर्णम् २ धोयेका रेसमीवस्त्रका नाम । वहुमूल्यं महाधनम् २ धेरै मोलपर्ने वस्त्रका नाम । क्षौमम्, त्रि.लि. दुकूलम्, नपुं. २ पीताम्बरादिवस्त्रका नाम ॥—निवीतम्, प्रावृतम्, ओढेका वस्त्रका नाम ॥—दशाः १ वस्त्रका छेउको नाम । स्त्रीलिङ्ग नित्यं वहुवचनान्त पनिछ ॥—दैर्घ्यम्, आयामः, आरोहः, ३ वस्त्रका लम्बाईको

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पटच्चरं जीर्णवस्त्रं समौ नक्तककर्पटौ १३०३
वस्त्रमाच्छादनं वासश्चलं वसनमंशुकम् १३०४
सुचेलकः पटोऽस्त्री स्याद्वराशिः स्थूलशाटकः १३०५
निचोलः प्रच्छदपटः समौ रल्लककम्बलौ १३०६
अन्तरीयोपसंव्यानपरिधानान्यधोंशुके १३०७
द्वौ प्रावारोत्तरासङ्गौ समौ वृहतिका तथा १३०८
संव्यानमुत्तरीयं च चोलः कूर्पासकोऽस्त्रियाम् १३०९
नीशारः स्यात्प्रावरणे हिमानिलनिवारणे १३१०
अर्धोरुकं वरस्त्रीणां स्याच्चण्डातकमस्त्रियाम् १३११
स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् १३१२

नाम ॥ परिणाहः, विशालता, २ चौडाईका नाम ॥—पटच्चरम्, जीर्णवस्त्रम्, २ पुराना वस्त्रका नाम ॥—नक्तकः, कर्पटः, २ पुराना मैला वस्त्रका टुकुराका नाम ॥—वस्त्रम्, आच्छादनम्, वासः, चैलम्, वसनम्, अंशुकम्, ६ सामान्यवस्त्रका नाम ॥—सुचेलकः, पटः, २ असल वस्त्रका नाम पटः पुं.नपुंमा छ ॥—वराशिः, स्थूलशाटकः, १ ठूला लामा साडी आदि वस्त्रका नाम ॥—निचोलः, प्रच्छदपटः, २ बीणा, डोली ढाकने तथा तन्ना आदि बिस्तरा ढाक्ने वस्त्रका नाम ॥—रल्लकः, कम्बलः, २ कम्बल (पाखी राडी रग)का नाम ॥—अन्तरीयम्, उपसंव्यानम्, परिधानम्, अधोंशुकम्, ४ धोतिका नाम ॥—प्रावारः, उत्तरासङ्गः, वृहतिका, संव्यानम्, उत्तरीयम्, ५ उपर्ना (पछेउराका) नाम ॥—चोलः, कूर्पासकः, २ चोलाका नाम। २ पुंलिङ्ग नपुंसकलिङ्गमा छन्। हिमानिलयोर्निवारणं यस्मात्तादृशे प्रावरणे नीशारः, १ जाडामा ओढने सिरक आदि गरम कपडाको नाम। यद्वरस्त्रीणां अर्धोरुकं अर्धोरुविधायकं वस्त्रं चण्डातकम् १ लहँगाको नाम। यत् आप्रपदं पादाग्रपर्यन्तं प्राप्नोति वस्त्रादि आप्रपदीनम् १ पाउसम्म ढाक्ने गरी ओढीने

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस्त्री वितानमुल्लोचो दूष्याद्यं वस्त्रवेश्मनि १३१३
प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा १३१४
परिकर्माङ्गसंस्कारः स्यान्मार्ष्टिर्मार्जना मृजा १३१५
उद्वर्तनोत्सादने द्वे समे आप्लाव आप्लवः १३१६
स्नानं चर्चा तु चार्चिक्यं स्थासकोऽथ प्रबोधनम् १३१७
अनुबोधः पत्रलेखा पत्राङ्गुलिरिमे समे १३१८
तमालपत्रतिलकचित्रकाणि विशेषकम् १३१९
द्वितीयं च तुरीयं च न स्त्रियामथ कुङ्कुमम् १३२०
काश्मीरजन्माग्निशिखं वरं बाह्लीकपीतने १३२१
रक्तसङ्कोचपिशुनं धीरं लोहितचन्दनम् १३२२

वस्त्रको नाम त्रिलिङ्गछ ।।—वितानम्, उल्लोचः, २ चाँदनी (चँदुवा)का नाम । वितानः पुंलिङ्गछ । दूष्य १ पालतम्बुका नाम । प्रतिसीरा, जवनिका, तिरस्करिणी, ३ पर्दाका नाम ।।—परिकर्म अङ्गसंस्कारः, २ अङ्ग सफा गर्ने कामका नाम ।।—उद्वर्तनम्, उत्सादनम्, २ बुकुवा साबुन आदिले शरीर को मयल साफ गर्नाका नाम ।।—आप्लावः, आप्लवः, स्नानम्, ३ स्नान गर्नाका नाम ।।—चर्चा, चार्चिक्यम्, स्थासकः, ३ चन्दन आदि लेपनगर्नुका नाम ।।—प्रबोधनम्, अनुबोधः, २ गन्ध उडी सकेका वस्तु लाई फेरी कोई उपायले सुगन्धित गरानुका नाम ।।—पत्रलेखा, पत्राङ्गुलिः, २ कस्तुरी केशर आदिले स्तन गाला इत्यादिमा माछाकार मकराकार इत्यादि लेखनाका नाम ।।—तमालपत्रम्, तिलकम्, चित्रकम्, विशेषकम्, ४ निधारमा लाईने टिकाका नाम । तिलकम्, विशेषकम्, नपुंसकमा छन् । कुङ्कुमम्, काश्मीरजन्म, अग्निशिखम्, वरम्, बाह्लीकम्, पीतनम्, रक्तम्, संकोचम्, पिशुनम्, धीरम्, लोहितचन्दनम्, ११ काश्मीरी केशरका नाम ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लाक्षा राक्षा जतु क्लीबे यावोऽलक्तो द्रुमामयः १३२३
लवङ्गं देवकुसुमं श्रीसंज्ञमथ जायकम् १३२४
कालीयकं च कालानुसार्यं चाथ समार्थकम् १३२५
वंशिकागुरुराजार्हलोहकृमिजजोङ्गकम् १३२६
कालागुर्वगुरु स्यात्तु मङ्गल्या मल्लिगन्धि यत् १३२७
यक्षधूपः सर्जरसो रालसर्वरसावपि १३२८
बहुरूपोऽप्यथ वृकधूपकृत्रिमधूपकौ १३२९
तुरुष्कः पिण्डकः सिह्लो यावनोऽप्यथ पायसः १३३०
श्रीवासो वृकधूपोऽपि श्रीवेष्टसरलद्रवौ १३३१
मृगनाभिर्मृगमदः कस्तूरी चाथ कोलकम् १३३२
कंकोलकं कोशफलमथ कर्पूरमस्त्रियाम् १३३३
घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका १३३४

—लाक्षा, राक्षा, जतु, यावः, अलक्तः, द्रुमामयः, ६ माहुरका नाम॥ —लवङ्गम्, देवकुसुमम्, श्रीसंज्ञम्, ३ ल्वाङ्का नाम ॥—जायकम्, कालीयकम्, कालानुसार्यम्, ३ पहेला धूपीका नाम ॥ वंशिकम्, अगुरु, राजार्हम्, लोहम्, कृमिजम्, जोङ्गकम्, कालागुरु, ७ सामान्य धूपीका नाम ॥ अगुरुः,मल्लिगन्धि मङ्गल्या ३ काला धूपीका नाम (बेलीको वास्नाहुने धूपीको १) ॥—यक्षधूपः, सर्जरसः, रालः, सर्वरसः, बहुरूपः, ५ साल धूपका नाम ॥—वृकधूपः, कृत्रिमधूपकः, २ बनावटी धेरै चीज मिलायेर बनायेका धूपका नाम ॥—तुरुष्कः, पिण्डकः, सिह्लः, यावनः, ४ लोवान (लोहवान सुगन्धि धूपका नाम ॥—पायसः, श्रीवासः, वृकधूपः, श्रीवेष्टः, सरलद्रवः, ५ सल्लाका खोटाका नाम ॥—मृगनाभिः, मृगमदः, कस्तूरी, ३ कस्तूरीका नाम ॥—मृगनाभिः पुंलिङ्गछ ॥—कोलकम्, कंकोलकम्, कोशफलम्, ३ कंकोलफल (कपुर) विशेषका नाम ॥—कर्पूरः, घनसारः, चन्द्रः, सिताभ्रः,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम् १३३५
तैलपर्णिकगोशीर्षे हरिचन्दनमस्त्रियाम् १३३६
तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनम् १३३७
कुचन्दनं चाथ जातीकोशजातीफले समे १३३८
कर्पूरागरुकस्तूरीकक्कोलैर्यक्षकर्दमः १३३९
गात्रानुलेपनी वर्तिर्वर्णकं स्याद्विलेपनम् १३४०
चूर्णानि वासयोगाः स्युर्भावितं वासितं त्रिषु १३४१
संस्कारो गन्धमाल्याद्यैर्यः स्यात्तदधिवासनम् १३४२
माल्यं मालास्रजौ मूर्ध्नि केशमध्ये तु गर्भकः १३४३

हिमवालुका, ५ कपुरका नाम ।। हिमवानुका त्रिलिङ्ग छ । कर्पूरः पुंलिङ्ग छ ।।—गन्धसारः, मलयजः, भद्रश्रीः, चन्दनः, ४ श्रीखण्ड-चन्दनका नाम ।।—तैलपर्णिकम्, गोशीर्षम्, हरिचन्दनम्, २ रातो-चन्दन विशेषका नाम ।।—तिलपर्णी, पत्राङ्गम्, रञ्जनम्, रक्तचन्दनम्, कुचन्दनम्; ५ रक्तचन्दनका नाम ।। जातीकोशम्, जातीफलम्, २ जाईफल-का नाम ।।—कर्पूरादिभिः समभागैः पिण्डीकृतो लेपविशेषो यक्षकर्दमः१ कपुर-धूमी-कस्तूरी-कक्कोल मिलायेर डल्लो बनायेका धूपको नाम ।।—गात्रानुलेपनी, वर्तिः, वर्णकम्, विलेपनम्, ४ शरीरमा लाउन पिसेर घोटेर बनायेका केसर, कस्तूरी, श्रीखण्डमिश्रित सुगन्धि द्रव्यका नाम ।।—चूर्णम्, वासयोगः, २ शरीरमा लाउने सुगन्धि द्रव्यको चूर्ण (बुकुवा) (पाउडर) आदि चूर्णका नाम ।।—भावितम्, वासितम्, २ सुगन्धि द्रव्यले सुगन्धित गरायेका वस्तुका नाम । २ द्रव्यगामि त्रिलिङ्गी छन् । गन्धमाल्यधूपादिभिर्यः संस्कारः सौरभाधानं तदधिवासनं १ सुगन्धि द्रव्यको वासनलाई शरीर वस्त्र आदिमा सार्नाको नाम ।।—माल्यम्, माला, स्रक्, चुल्ठा खोप जुराहरूमालाईने मालाका नाम ।।—केशमध्ये धृता माला गर्भकः १ चुल्ठा खोप जुराहरूमा झुण्डिनेगरी लाईने मालाको नाम ।।—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रभ्रष्टकं शिखालम्बि पुरोन्यस्तं ललामकम् १३४४
प्रालम्बमृजुलम्बि स्यात् कण्ठाद्वैकक्षिकं तु तत् १३४५
यत्तिर्यक्क्षिप्तमुरसि शिखास्वापीडशेखरौ १३४६
रचना स्यात्परिस्यन्द आभोगः परिपूर्णता १३४७
उपधानं तूपबर्हः शय्यायां शयनीयवत् १३४८
शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः १३४९
गेन्दुकः कन्दुको दीपः प्रदीपः पीठमासनम् १३५०
समुद्गकः संपुटकः प्रतिग्राहः पतद्ग्रहः १३५१
प्रसाधनी कङ्कतिका पिष्टातः पटवासकः १३५२

यन्माल्यं शिखायां लम्बमानं प्रभ्रष्टकं १ पगरी गुतेझैं शिरमा गुतिने मालाको नाम ॥—पुरोन्यस्तम् ललाटपर्यन्तं क्षिप्तं ललामकम् १ छातीमा सोझोगरी झुंतिने लामुमालाको नाम ॥— यन्माल्यं कण्ठादृजुलम्बि सरलं लम्बमानं प्रालम्बं १ जनै लगायेझैं छट्के पारेर लाईने मालाको नाम ॥—यन्माल्यं तिर्यगुपनीतमनृजु उरसि क्षिप्तं वैकक्षिकम् १ टेढो पारेर लगायेका मालाको नाम ॥—आपीडः, शेखरः, २ शिरमा लाईने झुप्पा र गुथाका नाम ॥—रचना, परिस्यन्दः, २ माला उन्नाका नाम ॥—आभोगः, परिपूर्णता, २ परिपूर्ण सेवाले चित्त बुझ्नु तृप्तहुनु सकिनु भरिनुका नाम ॥—उपधानम्, उपबर्हः, २ तकियाका नाम ॥—शय्या, शयनीयम्, शयनम्, ३ सुतने विछ्याउना (ओछ्यान)का नाम ॥—मञ्चः, पर्यङ्कः, पल्यङ्कः, खट्वा, ४ पलङ् (खाटका) नाम ॥—गेन्दुकः, कन्दुकः, २ गालेतकिया र भकुण्डाका नाम ॥—दीपः, प्रदीपः, २ दीपबत्तिका नाम ॥—पीठम्, आसनम, २ आसनका नाम ॥—समुद्गकः, संपुटकः, २ चाँदि आदिका सिंदुर हालने बट्टाका नाम ॥—प्रतिग्राहः, पतद्ग्रहः, २ फिक्दानीका नाम ॥—प्रसाधनी, कङ्कतिका, २ काँगियाका नाम ॥—पिष्टातः, पटवासकः, २ अबीर (सिन्दुर)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दर्पणे मुकुरादर्शौ व्यजनं तालवृन्तकम् १३५३

इति मनुष्यवर्गः ॥ ८. अथ ब्रह्मवर्गः

सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ १३५४

वंशोऽन्ववायः संतानो वर्णाः स्युर्ब्राह्मणादयः १३५५

विप्रक्षत्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृतम् १३५६

राजबीजी राजवंश्यो बीज्यस्तु कुलसंभवः १३५७

महाकुलकुलीनार्यसभ्यसज्जनसाधवः १३५८

ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये १३५९

आश्रमोऽस्त्री द्विजात्यग्रजन्मभूदेववाडवाः १३६०

विप्रश्च ब्राह्मणोऽसौ षट्कर्मा यागादिभिर्वृतः १३६१

विद्वान् विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः १३६२

का नाम ॥—दर्पणः, मुकुरः, आदर्शः, ३ ऐना (दर्पण) का नाम ॥—व्यजनम्, तालवृन्तकम्, २ पङ्खाका नाम ॥ इति बालकृष्णाश्रमी टीकायां मनुष्य वर्गः ॥

८ अथ ब्रह्मवर्गः ॥

१३५४–१४६८ सन्ततिः, गोत्रम्, जननम्, कुलम्, अभिजनः, अन्वयः, वंशः, अन्ववायः, संतानः, ६ सन्तानका नाम ॥—ब्राह्मणादयो वर्णाः १ चार वर्ण ब्राह्मणादिको नाम ॥—ब्राह्मणःक्षत्रियःवैश्यःशूद्राः १ ब्राह्मण-क्षत्रिय-वैश्य-शूद्र ४ वर्णका नाम ॥—राजबीजी, राजवंश्यः, २ राजघराना-का नाम ॥—बीज्यः, कुलसंभवः, २ कुलीनका घरमा जन्मलिनेका नाम ॥—महाकुलः, कुलीनः, आर्यः, सभ्यः, सजनः, साधुः, ६ कुलीन घरानियाँ सज्जनका नाम ॥—ब्रह्मचारी, गृही, वानप्रस्थः, भिक्षुः, ४ ब्रह्मचारी १ गृहस्थ २ वानप्रस्थ ३ संन्यासी ४ का नाम ॥—द्विजातिः, अग्रजन्मा, भूदेवः, वाडवः, विप्रः, ब्राह्मणः, ६ ब्राह्मणका नाम ॥—असौ ब्राह्मणो यागादिभिर्वृतः षट्कर्मा १ यज्ञगर्नु गराउँनु वेदशास्त्र पढ्नुपढाउनु

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः १३६३
धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः १३६४
दूरदर्शी दीर्घदर्शी श्रोत्रियच्छान्दसौ समौ १३६५
'मीमांसको जैमिनीये वेदान्ती ब्रह्मवादिनि ❀❀
वैशेषिके स्यादौलूक्यः सौगतः शून्यवादिनि ❀❀
नैयायिकस्त्वक्षपादः स्यात् स्याद्वादिक आर्हकः ❀❀
चार्वाकलौकायतिकौ सत्कार्ये साङ्ख्यकापिलौ' ❀❀
उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः १३६६
मन्त्रव्याख्याकृदाचार्य आदेष्टा त्वध्वरे व्रती १३६७
यष्टा च यजमानश्च स सोमवति दीक्षितः १३६८
इज्याशीलो यायजूको यज्वा तु विधिनेष्टवान् १३६९

दान दिनुलिनु ई ६ कर्मगर्ने ब्राह्मणको नाम ॥-विद्वान्, विपश्चित्, दोषज्ञः, सन्, सुधीः, कोविदः, बुधः, धीरः, मनीषी, ज्ञः, प्राज्ञः, संख्यावान्, पण्डितः, कविः, धीमान्, सूरिः, कृती, कृष्टिः, लब्धवर्णः, विचक्षणः, दूरदर्शी, दीर्घदर्शी, २२ पण्डितका नाम ॥—श्रोत्रियः, छान्दसः, २ वेद पढाउने वैदिकका नाम ॥—मीमांसकः, १ जैमिनिकृत मीमांसा पढने र जान्नेको नाम॥ वेदान्ती, ब्रह्मवादी, २ वेदान्त पढने र जान्नेका नाम ॥ नैयायिकः, अक्षपादः, २ वैशेषिक सप्तपदार्थवादी न्यायशास्त्र पढने जान्नेका नाम ॥ स्याद्वादिकः, आर्हकः, २ बौद्धशास्त्र पढने जान्नेका नाम॥ चार्वाकः, लौकायतिकः २।१६ पदार्थ जान्ने पढने नैयायिकका नाम॥ सांख्यः, कापिलः, २ सांख्यशास्त्र जान्नेका नाम ॥-उपाध्यायः, अध्यापकः, २ पढाउने गुरुका नाम ॥—निषेककर्ता पित्रादिर्गुरुः १ गर्भाधानादि संस्कार गर्ने र मन्त्र सुनाउनेका नाम ॥—आचार्यः १ साङ्गोपाङ्ग वेद अर्थसहित पढाउनेका नाम ॥—व्रती, यष्टा, यजमानः, ३ यज्ञ गर्नेका नाम ॥-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स गीष्पतीष्ट्या स्थपतिः सोमपीथी तु सोमपाः १३७०
सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षिणः १३७१
अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः १३७२
लब्धानुज्ञः समावृत्तः सुत्वा त्वभिषवे कृते १३७३
छात्रान्तेवासिनौ शिष्ये शैक्षाः प्राथमकल्पिकाः १३७४
एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः १३७५
सतीर्थ्यास्त्वेकगुरवश्चितवानग्निमग्निचित् १३७६
पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययम् १३७७
उपज्ञा ज्ञानमाद्यं स्याज्ज्ञात्वारम्भः उपक्रमः १३७८
यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः १३७९

दीक्षितः १ सोमयागको दीक्षा ग्रहण गर्नेको नाम ।।—इज्याशीलः, यायजूकः, २ धेरै यज्ञ गर्नेका नाम ।।—यज्वा १ विधिपूर्वक यज्ञ गर्नेको नाम ।।—स्थपतिः १ बृहस्पति सव गर्नेका नाम ।।—सोमपीथी, सोमपाः, २ सोमयाग गर्ने सोमपानगर्नेका नाम ।।—सर्ववेदाः १ विश्वजित् यज्ञ गर्नेको नाम ।। अनूचानः १ साङ्गोपाङ्ग वेद पढनेको नाम ।।—समावृत्तः १ गुरुकुलमा वेदाऽध्ययन सकिये पछि गुरुका आज्ञाले गृहस्थाश्रम गर्न लाई समावर्तन कर्म गर्नेको नाम ।। अभिषवे स्नाने कृते सति सुत्वा १ यज्ञ सिध्यायेर अवभृथ स्नान गर्नेको नाम ।।—छात्रः, अन्तेवासी, शिष्यः, ३ शिष्यका नाम ।।—शैक्षाः, प्राथमकल्पिकाः, २ भर्खरवेद पढन थालेका बटुक छात्रका नाम । सब्रह्मचारिण १ एकै पाठ गरेर पढने सहाध्यायीको नाम । सतीर्थ्याः १ एकै गुरु सित वेग्लैर पाठ पढनेका नाम । योऽग्निं चितवान् सोऽग्निचित् १ अग्नि होत्र र चयन यज्ञ गर्नेको नाम ।। ऐतिह्यम्, इतिह, २ बूढा बूढाले परंपरा वाट भनी आयेको अरु प्रमाण नभयेको कुराका नाम ।। उपज्ञाः १ पहिला ज्ञानको नाम। ज्ञात्वा य आरम्भः स उपक्रमः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः १३८०
एते पञ्चमहायज्ञा ब्रह्मयज्ञादिनामकाः १३८१
समज्या परिषद्गोष्ठी सभासमितिसंसदः १३८२
आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः १३८३
प्राग्वंशः प्राग्घविर्गेहात् सदस्या विधिदर्शिनः १३८४
सभासदः सभास्ताराः सभ्याः सामाजिकाश्च ते १३८५
अध्वर्यूद्गातृहोतारो यजुः सामर्ग्विदः क्रमात् १३८६
आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते १३८७

जानेर गर्नेथालनुको नाम ॥—यज्ञः, सवः, अध्वरः, यागः, सप्ततन्तुः, मखः, क्रतुः, ७ यज्ञका नाम ॥—पाठः, होमः, अतिथीनां सपर्या, तर्पणम्, बलिः, ५ वेदाऽध्ययनऽध्यापन रूपी ब्रह्म यज्ञ १ नित्यहोम रूपी देवज्ञ २ अतिथि सेवा रूपी मनुष्ययज्ञः ३ नित्य तर्पण नित्यश्राद्धरूपीपितृयज्ञ ४ बलिवैश्व देव रूपी भूतयज्ञ ५ ई पाँच यज्ञका नाम ॥—समज्या, परिषत्, गोष्ठी, सभा, समितिः, संसत्, आस्थानी, आस्थानम्, सदः, ९ सभाका नाम । सदः नपुंमा सान्तछ सदाः स्त्रीलिङ्गछ । आस्थानी नपुंमापनिछ ॥—हविर्गेहात्प्राक् सदस्यादीनां यद्गृहं स प्राग्वंशः १ यज्ञशालामा सदस्यहरूलाई राख्ने हवि राख्ने ठाउभन्दा पूर्व पट्टिका ठाउको नाम । यज्ञकर्मणि विधिं वेदोक्तक्रिया-कलापं ये पश्यन्ति ते सदस्याः १ यज्ञको विधि पूरा जान्नेको नाम ॥ सभासदः, सभास्ताराः, सभ्याः, सामाजिकाः, ४ सभामा बस्ने भले आमीका नाम । यजुर्विदृत्विक् अध्वर्युः, १ यजुर्वेदको काम गर्ने ऋत्विक विशेषको नाम । सामविदुद्गाता १ सामवेदको काम गर्ने ऋत्विक् विशेषको नाम । ऋग्वेदवित् होता १ ऋग्वेदको काम गर्ने ऋत्विग् विशेषको नाम । ऋत्विजः, याजकाः, २ सामान्य ऋत्विग्का नाम । ऋत्विग् यज्ञको काममा वरण गरियेका ब्राह्मण माथि देखायेका ३ प्रकारका र आग्नीध्र-उद्गाता-ब्रह्मा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वेदिः परिष्कृता भूमिः समे स्थण्डिलचत्वरे १३८८
चषालो यूपकटकः कुम्बा सुगहना वृतिः १३८९
यूपाग्रं तर्म निर्मन्थ्यदारुणि त्वरणिर्द्वयोः १३९०
दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः १३९१
अग्नित्रयमिदं त्रेता प्रणीतः संस्कृतोऽनलः १३९२
समूह्यः परिचाय्योपचाय्यावग्नौ प्रयोगिणः १३९३
यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते १३९४
तस्मिन्नानाय्योऽथाग्नायी स्वाहा च हुतभुक्प्रिया १३९५
ऋक् सामिधेनी धाय्या च या स्यादग्निसमिन्धने १३९६

इत्यादि गरेका १६ प्रकारका हुन्छन् कात्यायन श्रौत सूत्रमाछन् । परिष्कृता भूमिर्वेदिः १ यज्ञ गर्न बनायेकी भूमीको नाम ।।—स्थण्डिलम्, चत्वरम् , २ यज्ञका निमित्त केहि ऊचार संस्कार गरियेको जमीनका नाम । यूपकटकः काष्ठविकारश्चषालः २ यज्ञका मैलाको टुप्पामा राख्नु पर्ने वाटुला काष्ठ विशेषका नाम । सुगहना वृतिर्वेष्टनं कुम्बा १ यज्ञिय कर्म अरू अयोग्य व्यक्तिले नदेखुन् भन्नाका निमित्त बनायेका घेरा बारको १ स्त्रीलिङ्ग-माछ ।।—यूपाग्रम्, तर्म, २ मौलाका टुप्पाको नाम । निर्मन्थ्यदारुणि अरणिः १ अग्निमन्थनगर्दा मन्थन काष्ठ अड्याउने तलर माथि २ काठ अधरारणि र उत्तरारणिको नाम । स्त्री. पुं. माछ ।।—दक्षिणाग्निः, गार्हपत्यः, आहवनीयः, ३ यज्ञका ३ अग्निका नाम । इदमग्नित्रयं त्रेता १ ई ३ अग्निको सामूहिक नाम । मन्त्रादिना संस्कृतोऽग्निः, प्रणीतः १ वेदका मन्त्र पढेर संस्कार गरियेका अग्निको नाम ।।—समूह्यः, परिचाय्यः, उपचाय्यः, ३ अग्निका स्थान विशेषका (राख्ने ठाउका) नाम ।। आनाय्यः १ गार्हपत्यबाट ल्यायेर संस्कार गरेका दक्षिणाग्निको नाम ।।—अग्नायी, स्वाहा, हुतभुक्प्रिया ३ अग्निकी पत्नी स्वाहाका नाम । सामिधेनी, धाय्या, २ अग्निबाल्दा जुनमन्त्र

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गायत्रीप्रमुखं छन्दो हव्यपाके चरुः पुमान् १३९७
आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः १३९८
धुवित्रं व्यजनं तद्यद्रचितं मृगचर्मणा १३९९
पृषदाज्यं सदध्याज्ये परमान्नं तु पायसम् १४००
हव्यकव्ये दैवपित्र्ये अन्ने पात्रं स्रुवादिकम् १४०१
ध्रुवोपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः १४०२
उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः १४०३
परम्पराकं शमनं प्रोक्षणं च वधार्थकम् १४०४
वाच्यलिङ्गाः प्रमीतोपसंपन्नप्रोक्षिता हते १४०५
सांनाय्यं हविरग्नौ तु हुतं त्रिषु वषट्कृतम् १४०६

पढेर बालिन्छतिमन्त्रको नाम । गायत्र्युष्णिगित्यादि छन्दः १ छन्दको नाम। चरुः १ चरुको नाम । आमिक्षा १ तातेका दूधमा अमिलो दहि मिलायेर बनायेको हविः होम गर्ने वस्तुको नाम । मृगचर्मणा रचितं यद्व्यजनं धुवित्रम् १ यज्ञको आगो फुक्ने मृगचर्मले बनायेका पङ्खाको नाम ॥—दधियुक्ते घृते पृषदाज्यम् १ दहिमिलायेका घिउको नाम ॥–परमान्नम् ,पायसम् ,२ खीरका नाम ॥—दैवपित्र्येऽन्ने क्रमेण हव्य-कव्ये २ देवतालाई चढाउने वस्तुको हव्यः पितृलाई चढाउने वस्तुको कव्यः जान्नु ॥—स्रुवचमसादिकं पात्रं १ सुरो-प्रणिता-प्रोक्षणी प्रभृति यज्ञका भाँडाको नाम ॥—ध्रुवा, उपभृत्, जुहूः,३ ध्रुवा-उपभृत्-जुहू-स्रुक् ४ प्रकारका सुराका ४ नाम ॥ सबैस्त्रीलिङ्गी छन् । स्रुव पुं.मात्र ॥—क्रतौ यः पशुरभिमन्त्र्य हतः स उपाकृतः १ अभिमन्त्रण गरेर यज्ञमा मारिने पशुका नाम ॥—परम्पराकम्, शमनम्, प्रोक्षणम्, ३ यज्ञमा हुने पशु बधका नाम ॥—प्रमीतः, उपसंपन्नः, प्रोक्षितः, ३ यज्ञमा मारियेका पशुका नाम ॥—हविर्विशेषः सान्नाय्यं १ होम गरिने वस्तुका

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दीक्षान्तोऽवभृथो यज्ञे तत्कर्मार्हं तु यज्ञियम् १४०७
त्रिष्वथ क्रतुकर्मेष्टं पूर्तं खातादि कर्म यत् १४०८
अमृतं विघसो यज्ञशेषभोजनशेषयोः १४०९
त्यागो विहापितं दानमुत्सर्जनविसर्जने १४१०
विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् १४११
प्रादेशनं निर्वपणमपवर्जनमंहतिः १४१२
मृतार्थं तदहे दानं त्रिषु स्यादौर्ध्वदेहिकम् १४१३
पितृदानं निवापः स्याच्छ्राद्धं तत्कर्म शास्त्रतः १४१४
अन्वाहार्यं मासिकेंऽशोऽष्टमोऽह्नः कुतपोऽस्त्रियाम् १४१५

नाम ॥—वषट्कृतं १ ॐ श्रौषट् वौषट् गरेर होम गरियेका वस्तुको नाम ॥ त्रिलिङ्गीछ ॥ दीक्षान्तः अवभृथः २ यज्ञ समाप्तिका कर्मका नाम ॥ यज्ञियम् १ यज्ञकर्ममा लायक वस्तुको नाम त्रिलिङ्गीछ ॥ इष्टं १ यज्ञ दान-पूजा आदि यज्ञ कर्मको नाम ॥—खातादि यत्कर्म तत् पूर्तम् १ तलाउ-धारो-ईनार-पौवा-पाटी-मन्दिर-पुल सार्वजनिक इत्यादि बनायेर उत्सर्जन गर्नुका नाम ॥—यज्ञशेषे पुरोडाशादौ अमृतम् १ यज्ञशेषवस्तुका नाम ॥—भोजनशेषे विघसम् १ अतिथि-गुरु-संन्यासी-प्रभृतिलाई खुवायेर बाकिरहेका वस्तुको नाम ॥—त्यागः, विहापितम्, दानम्, उत्सर्जनम्, विसर्जनम्, विश्राणनम्, वितरणम्, स्पर्शनम्, प्रतिपादनम्, प्रादेशनम्, निर्वपणम्, अपवर्जनम्, अंहतिः, १३ दानका नाम ॥—अंहतिः स्त्रीलिङ्गछ औध्वदेहिकम् १ मरेका मानिसका निमित्त गरिने दाह श्राद्धादि कर्मको नाम ॥—त्रिलिङ्गीछ ॥—पितृदानम्, निवापः, २ मरेका पितृका निमित्त गरिने तर्पण पिण्ड प्रभृति दानको नाम ॥—श्राद्धम् १ श्राद्धको नाम ॥—मासिके-ऽन्वाहार्यं १ औंसी श्राद्ध र मासिक श्राद्धको नाम ॥—अह्नोऽष्टमोंऽशः कुतपः १ दिनका आठ भागका प्रथम भागको नाम ॥ कुतपम् नपुंमाछ ॥—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पर्येषणा परीष्टिश्चान्वेषणा च गवेषणा १४१६
सनिस्त्वध्येषणा याच्ञाऽभिशस्तिर्याचनार्थना १४१७
षट् तु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणि १४१८
क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्र साधुनि १४१९
स्युरावेशिक आगन्तुरतिथिर्ना गृहागते १४२०
'प्राघूर्णिकः प्राघुणकश्चाभ्युत्थानं तु गौरवम्' ❀❀
पूजा नमस्याऽपचितिः सपर्यार्चार्हणाः समाः १४२१
वरिवस्या तु शुश्रूषा परिचर्याप्युपासना १४२२
व्रज्याटाट्या पर्यटनं चर्या त्वीर्यापथे स्थितिः १४२३
उपस्पर्शस्त्वाचमनमथ मौनमभाषणम् १४२४

पर्येषणा, परीष्टिः, २ श्राद्धमा ब्राह्मणको सेवा गर्नुका नाम ॥—अन्वेषणा, गवेषणा, २ धर्म मार्गको खोज गर्नुका नाम ॥—सनिः, अध्येषणा, २ खोजनाका नाम ॥—याच्ञा, अभिशस्तिः, याचना, अर्थना, ४ मागनाका नाम ॥—अर्घ्यं १ अर्घमा चाहिने वस्तु जल-दूद-कुश-दहि-घिउ-सस्युं-अक्षता-जउ सहित जलको नाम ॥—पादाय वारिणि पाद्यम् १ पाउधुने जलको नाम ॥—आतिथ्यम् १ अतिथि सत्कारका नाम ॥—आतिथेयम् १ अतिथिको सत्कार गर्न जान्ने मानिसको नाम त्रिलिङ्गीछ ॥—आवेशिकः, आगन्तुः, अतिथिः, गृहागतः, ४ घरमा अकस्मात आयेका साधारण पाहुनाका नाम ॥ पुंमाछन् ॥—अभ्युत्थानं, गौरवं २ स्वागतका नाम ॥ प्राघूर्णिकः प्राघुणकः साधारण पाहुनाका नाम ॥—पूजा, नमस्या, अपचितिः, सपर्या, अर्चा, अर्हणा, ६ पूजाका नाम ॥—वरिवस्या, शुश्रूषा, परिचर्या, उपासना, ४ सेवा टहलका नाम ॥—व्रज्या, अटा, अट्या, पर्यटनम्, ४ घुमफिर (टहल्नु) का नाम ॥—चर्या १ योगमार्गमा रहनुका नाम ॥—उपस्पर्शः, आचमनम्, २ आचमनका नाम ॥—मौनम्, अभाषणम्, २ मौनका नाम ॥—आनुपूर्वी,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

'प्राचेतसश्चादिकविः स्यान्मैत्रावरुणिश्च सः **
वाल्मीकिश्चाथ गाधेयो विश्वामित्रश्च कौशिकः **
व्यासो द्वैपायनः पाराशर्यः सत्यवतीसुतः' **
गौतमोऽत्रिभरद्वाजो विश्वामित्रोऽथकश्यपः **
जमदग्निर्वसिष्ठश्च सप्तर्षयः इमे स्मृताः **
आनुपूर्वी स्त्रियां वावृत् परिपाटी अनुक्रमः १४२५
पर्यायश्चातिपातस्तु स्यात्पर्यय उपात्ययः १४२६
नियमो व्रतमस्त्री तच्चोपवासादि पुण्यकम् १४२७
औपवस्तं तूपवासो विवेकः पृथगात्मता १४२८
स्याद्ब्रह्मवर्चसं वृत्ताध्ययनर्द्धिरथाञ्जलिः १४२९
पाठे ब्रह्माञ्जलिः पाठे विप्रुषो ब्रह्मबिन्दवः १४३०
ध्यानयोगासने ब्रह्मासनं कल्पे विधिक्रमौ १४३१

आवृत्,प्राचेतसः,आदिकविः,मैत्रावरणिः,वाल्मीकिः, ४ वाल्मीकि ऋषिका नाम ॥ गाधेयः, विश्वामित्रः, कौशिकः, ३ नूतन सृष्टि कर्ता विश्वामित्रका नाम ॥ व्यासः, द्वैयायनः, पाराशर्यः, सत्यवतीसुतः वेद विभाग १८ पुराण महाभारत ब्रह्मसूत्र इत्यादि प्रणेता व्यासजीका नाम ॥ गौतमः, अत्रिः, भारद्वाजः, विश्वामित्रः, कश्यपः, जमदग्निः, वसिष्ठः, ७ सप्त ऋषिका नाम ॥ परिपाटी, अनुक्रमः, पर्यायः, ३ क्रम (पालापालि) का नाम ॥— अतिपातः, पर्ययः, उपात्ययः ३ पालोलाई उच्छिन्नाका नाम ॥—नियमः, व्रतम्, २ व्रतका नाम ॥—औपवस्तम् , उपवासः, २ उपवास (निराहार) का नाम ॥—पृथगात्मता विवेकः २ आत्म ज्ञानरूपी विचारका नाम ॥— ब्रह्मवर्चसं १ आचार र अध्ययनबाट भयेका ब्रह्म तेजको नाम । पाठे वेदपठने योऽञ्जलिः स ब्रह्माञ्जलिः, वेद पढदा हात जोर्नाको नाम । अध्ययन-स्यादौ हस्तयोर्हि प्रणवोच्चारपूर्वकमञ्जलिः क्रियते । वेदपाठे विप्रुषो ब्रह्मबिन्दवः वेद पढ्दा मुखवाट उडेका थुकका छिटाको नाम । ब्रह्मासनं १ ध्यानगर्दा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मुख्यः स्यात्प्रथमः कल्पोऽनुकल्पस्तु ततोऽधमः १४३२
संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः १४३३
समे तु पादग्रहणमभिवादनमित्युभे १४३४
भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी १४३५
तपस्वी तापसः पारिकाङ्क्षी वाचंयमो मुनिः १४३६
तपःक्लेशसहो दान्तो वर्णिनो ब्रह्मचारिणः १४३७
ऋषयः सत्यवचसः स्नातकस्त्वाप्लुतो व्रती १४३८
ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते १४३९
यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ १४४०
स्थाण्डिलश्चाथ विरजस्तमसः स्युर्द्वयातिगाः १४४१

योगाभ्यास गर्दा बाँधनु पर्ने आसनको नाम ।।—कल्पः, विधिः, क्रमः, ३ विधिका नाम । मुख्यः १ शास्त्रीय मुख्य विधिको नाम । अनुकल्पः १ गौण विधिको नाम । उपाकरणं १ विधिपूर्वक वेदारम्भ गर्नुको नाम । पादग्रहणम्, अभिवादनम्, २ नाम उच्चारण पूर्वक ढोगनाको नाम ।।—भिक्षुः, परिव्राट्, कर्मन्दी, पाराशरी, मस्करी, ५ संन्यासीका नाम ।।—तपस्वी, तापसः, पारिकाङ्क्षी, ३ तपस्वीका नाम ।।—वाचंयमः, मुनिः, २ विषय छोडेका तत्वज्ञान भयेका काम-क्रोध-नहुने ध्यानमा तत्पर व्यवहार छाडने जितेन्द्रिय सुवर्णर माटो एकै ठान्ने महात्माका नाम ।।—दान्तः १ तपस्याको दुख सहन शक्नेको नाम ।।—वर्णी, ब्रह्मचारी, २ ब्रह्मचारीका नाम ।।—ऋषिः, सत्यवचाः, २ तपस्याले निष्पाप भयेका सत्यवादी वेद वेदान्त जान्ने महात्माका नाम । स्नातकः १ समावर्तन कर्म गरिसक्ने ब्रह्मचारीको नाम । यतिनः, यतयः, २ जितेन्द्रिय संन्यासीका नाम । स्थण्डिलशायी, स्थाण्डिलः, २ भुईंमा सुत्ने व्रत गर्नेका नाम ।।—विरजस्तमाः, द्वयातिगः, २ रजो गुण तमो गुण नहुने सात्विक सज्जनका नाम ।।—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पवित्रः प्रयतः पूतः पाखण्डाः सर्वलिङ्गिनः १४४२
पालाशो दण्ड आषाढो व्रते राम्भस्तु वैणवः १४४३
अस्त्री कमण्डलुः कुण्डी व्रतिनामासनं वृषी १४४४
अजिनं चर्म कृत्तिः स्त्री भैक्षं भिक्षाकदम्बकम् १४४५
स्वाध्यायः स्याज्जपः सुत्याऽभिषवः सवनं च सा १४४६
सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणम् १४४७
दर्शश्च पौर्णमासश्च यागौ पक्षान्तयोः पृथक् १४४८
शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः १४४९
नियमस्तु स यत्कर्म नित्यमागन्तुसाधनम् १४५०
'क्षौरं तु भद्राकरणं मुण्डनं वपनं त्रिषु' ❀❀❀
उपवीतं ब्रह्मसूत्रं प्रोद्धृते दक्षिणे करे १४५१

पवित्रः, प्रयतः, पूतः, ३ पवित्र शुद्धका नाम ॥—पाखण्डः, सर्वलिङ्गी, २ पाखण्डी सनातन धर्मविरोधि बौद्धादिका नाम। आषाढ १ ब्राह्मण ब्रह्मचारीले लिने पालाशको दण्डः ठहुराको नाम ॥ राम्भः १ बाँसका लहुराको नाम ॥—कमण्डलुः, कुण्डी, २ व्रतीको जलपात्र (कमण्डलु) का नाम ॥—वृषी १ व्रतगर्ने ऋषिमुनिले वस्ने आसनको नाम॥—अजिनम्, चर्म, कृत्तिः, ३ मृगादिका चर्मका नाम॥—कृत्तिः स्त्रीलिङ्गछ। भिक्षाणां समूहो भैक्षम् १ भिक्षान्नका समूहको नाम ॥—स्वाध्यायः, जपः, २ स्वाध्याय (वेदाध्ययन) का नाम ॥—सुत्या, अभिषवः, सवनम्, ३ सोमलताबाट रस निकाल्नु पर्दा गर्नु पर्ने कर्मका नाम ॥—जप्यम् १ सबै पाप नाशगर्ने मन्त्रविशेषका नाम ॥—अघमर्षणं १ अघमर्षण मन्त्रको नाम ॥—दर्शः, पौर्णमासः२ औंसीमा गरीने दर्शः पूर्णिमामा गरिने पौर्णमास २यज्ञका नाम॥ यमः, शरीरले गर्नु पर्ने अहिंसा-सत्यभाषण-अस्तेय (नचोर्नु) ब्रह्मचर्य-अपरिग्रह ई ५ को १ नाम ॥ नियमः १ शौच-सन्तोष-तप-स्वाध्याय ईश्वर सेवा ई ५ को १ नाम ॥—क्षौरं, भद्राकरणम्, मुण्डनं, वपनं, ४ मुण्डन का

११

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्राचीनावीतमन्यस्मिन्निवीतं कण्ठलम्बितम् १४५२
अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्गुल्योर्मूले कायम् १४५३
मध्येऽङ्गुष्ठाङ्गुल्योः पित्र्यं मूले त्वङ्गुष्ठस्य ब्राह्मम् १४५४
स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि १४५५
देवभूयादिकं तद्वत्कृच्छ्रं सांतपनादिकम् १४५६
संन्यासवत्यनशने पुमान्प्रायेोऽथ वीरहा १४५७
नष्टाग्निः कुहना लोभान्मिथ्येर्यापथकल्पना १४५८
व्रात्यः संस्कारहीनः स्यादस्वाध्यायो निराकृतिः १४५९
धर्मध्वजी लिङ्गवृत्तिरवकीर्णी क्षतव्रतः १४६०
सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च १४६१

नाम ।। उपवीतम्, १ बाँयाँकाँधबाट दाहिने कटितिर पुग्नेगरी लायेको (सव्य) जनैको नाम ।। प्राचीनावीतं १ अपसव्य गरी लायेका जनैको नाम ।। निवीतं १ मालाझैं घाँटीमा लायेका निवीति जनैको नाम ।। दैवं तीर्थं १ दैवतीर्थ (पाँच अउँला जोडेका बेला पाँचै अउँलाका अग्रभागको नाम ।। कायम् १ साहिंला र कान्छा अउँलाका फेद (कायतीर्थ)को नाम ।। पित्र्यम् १ बुढी अउँला र तर्जनीको बीचमा पितृतीर्थको नाम ।। ब्रह्मतीर्थः १ बूढी अउँलाका फेदको नाम ।।—ब्रह्मभूयम्, ब्रह्मत्वम्, ब्रह्मसायुज्यम्, ३ ब्रह्ममा मिलनका नाम ।।—देवभूयम्, देवत्वम्, देवसायुज्यम्, ३ देवतामा मिलनका नाम ।। कृच्छ्रं १ शरीर शुद्धीका निमित्त गोमूत्र-गोबर-गोदुग्ध-गोदधि-गोघृत, कुशजल ई ६ वस्तुमा १।१ वस्तु प्रति दिन खायेर सातौं दिनमा निराहार रहनुपर्ने सान्तपनकृच्छ्र आदि गरेका भिन्न २ प्रकारले गर्नु पर्ने पर्णकृच्छ्र चान्द्रायण आदिगरेका व्रतका नाम ।। प्रायः १ संन्यास पूर्वक भोजनको बिलकुल त्याग गर्नुको नाम ।।—वीरहा, नष्टाग्निः, २ अग्निहोत्र त्याग गर्नेको नाम ।। कुहना १ लोभले भूटो मार्गको कल्पना गर्नेको

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अंशुमानभिनिर्मुक्ताभ्युदितौ च यथाक्रमम् १४६२
परिवेत्ताऽनुजोऽनूढे ज्येष्ठे दारपरिग्रहात् १४६३
परिवित्तिस्तु तज्ज्यायान् विवाहोपयमौ समौ १४६४
तथा परिणयोद्वाहोपयामाः पाणिपीडनम् १४६५
व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम् १४६६
त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः १४६७
सबलैस्तैश्चतुर्भद्रं जन्याः स्निग्धा वरस्य ये १४६८
विवाहयात्रा सत्रास्त्रैवरयात्रा प्रकीर्तिताः ❀❀
जनित्रयात्रा सजनैर्वरस्य स्वगृहागमः ❀❀

इति ब्रह्मवर्गः ॥

नाम ॥ व्रात्य : १ उपनयनादि संस्कार नभयेकाको नाम ॥ अस्वाध्यायः निराकृतिः २ नपढेकाका नाम ॥—धर्मध्वजी, लिङ्गवृत्तिः, २ पेट पालनलाई ठगभेष गर्नेको नाम ॥=अवकीर्णी, क्षतव्रतः, २ ब्रह्मचर्य नष्ट हुनेका नाम ॥ अभिनिर्मुक्तः, १ सूर्यास्त हुँदा सूती रहनेको नाम ॥ अभ्युदितः, १ सूर्य उदाउँदासम्म सूती रहनेको नाम ॥ परिवेत्ता १ दाज्यूको भन्दा आफ्नु विवाह पैले गर्ने भाईको नाम ॥ परिवित्तिः १ भाईको विवाह हुँदा पनि विवाह न हुने दाज्यूको नाम ॥—विवाहः, उपयमः, परिणयः, उद्वाहः, उपयामः, पाणिपीडनम्, ६ विवाहका नाम ॥—व्यवायः, ग्राम्यधर्मः, मैथुनम्, निधुवनम्, रतम्, ५ रति (मैथुन) का नाम ॥—धर्मः वेदविहितो यागादिः, कामः यथाविधि स्त्रीसेवनम्, अर्थः धनम्, एभिस्त्रिभिः समुदित-त्रिवर्गः १ धर्मः, अर्थः, कामः, को १ नाम ॥ समोक्षकैः धर्मार्थकाममोक्षैः समुदितश्चतुर्वर्गः १ धर्मः, अर्थः, कामः, मोक्षः, चार पुरुषार्थको नाम ॥—तैर्धर्मादिभिः सबलैश्चतुर्भद्रः १ धर्मः, अर्थः, कामः, बलः, चारको १ नाम ॥—वरस्य स्निग्धा वयस्याः जन्याः २ दुलहाका प्रेमी समान वयका आपस्तका

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९. अथ क्षत्रियवर्गः

मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् १४६९

राजा राट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः १४७०

राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः १४७१

चक्रवर्ती सार्वभौमो नृपोऽन्यो मण्डलेश्वरः १४७२

येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः १४७३

शास्ति यश्चाज्ञया राज्ञः स सम्राडथ राजकम् १४७४

राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात् १४७५

मन्त्री धीसचिवोऽमात्योऽन्ये कर्मसचिवास्ततः १४७६

महामात्राः प्रधानानि पुरोधास्तु पुरोहितः १४७७

नाम ॥ विवाहयात्रा, वरयात्रा, सत्रा ३ वरयात्री (वरीयाँत) का नाम॥ जनित्रयात्रा १ दुलही लियेर वरका घर आउने सवधू वरयात्री (जन्ती) को नाम ॥

१४६९-१४७० मूर्धाभिषिक्तः, राजन्यः, बाहुजः, क्षत्रियः, विराट् ५ क्षत्रियका नाम ॥—राजा, राट्, पार्थिवः, क्ष्माभृत्, नृपः, भूपः, महीक्षित्, ७ राजाका नाम ॥ अधीश्वरः १ आफ्ना सिमा मिलेका (सन्धिवार) राजाहरूलाई वसपार्ने राजाको नाम ॥ चक्रवर्ती, सार्वभौमः, २ चक्रवर्ती राजाका नाम ॥ मण्डलेश्वरः १ रजौटाको नाम ॥ राजसूयाख्यक्रतुविशेषेण येनेष्टं, द्वादशमण्डलस्येश्वरश्च यः, यश्च स्वाज्ञया सर्वभूपान् शास्ति, ईदृशविशेषणत्रयेण विशिष्टो राजा सम्राट् १ राजसूय यज्ञगर्ने मण्डलिक सजालाई वस गर्ने चक्रवर्ती राजाको नाम ॥ राजकः, १ राजाका समूहको नाम॥ क्षत्रियाणां गणे राजन्यकं १ क्षत्रियका समूहको नाम ॥—मन्त्री, धीसचिवः, अमात्यः,३ मन्त्रीका नाम ॥ कर्मसचिवाः१ सलाह दिने काजीहरूको नाम॥ —महामात्राः, प्रधानानि, २ राजाका मुख्य सहायक (प्रधान) का

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ १४७८
प्रतीहारो द्वारपालद्वास्स्थद्वास्थितदर्शकाः १४७९
रक्षिवर्गस्त्वनीकस्थोऽथाऽध्यक्षाधिकृतौ समौ १४८०
स्थायुकोऽधिकृतो ग्रामे गोपो ग्रामेषु भूरिषु १४८१
भौरिकः कनकाध्यक्षो रूप्याध्यक्षस्तु नैष्किकः १४८२
अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः १४८३
सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते १४८४
शण्ढो वर्षवरस्तुल्यौ सेवकार्थ्यनुजीविनः १४८५
विषयानन्तरो राजा शत्रुर्मित्रमतः परम् १४८६
उदासीनः परतरः पार्ष्णिग्राहस्तु पृष्ठतः १४८७

नाम ।।—पुरोधाः, पुरोहितः, २ पुरोहितका नाम ।।—प्राड्विवाकः, अक्षदर्शकः, २ मुद्दा हेर्ने डिठ्ठा विचारी प्रभृतिका नाम ।।—प्रतीहारः, द्वारपालः, द्वास्थः, द्वास्थितः, दर्शकः, ५ द्वारपाल (ढोकेपाले) का नाम ।।—रक्षिवर्गः, अनीकस्थः, २ आठ पहरियाका नाम ।।—अध्यक्षः, अधिकृतः, २ कुनै काममा अधिकार दियेर खटायेका अध्यक्षका नाम ।।—स्थायुकः १ ग्रामाध्यक्षः, (जमीन्दार) को नाम ।। गोपः १ धेरै गाउका अध्यक्ष (चौधरी) को नाम ।।—भौरिकः, कनकाध्यक्षः, २ सुवर्णविभागका अध्यक्षका नाम ।।—रूप्याध्यक्षः, नैष्किकः, २ चाँदीविभागका अध्यक्षका नाम ।। अन्तःपुरेऽधिकृतो जनः अन्तर्वंशिकः १ अन्तपुरका अध्यक्षको नाम ।।—सौविदल्लाः, कञ्चुकिनः, स्थापत्याः, सौविदाः, ४ अन्तःपुरका चोबदारका नाम ।।—शण्ढः, वर्षवरः, २ अन्तपुरका नपुंसक (खोजा) का नाम ।।—सेवकः, अर्थी, अनुजीवी, ३ साधारण चाकरका नाम ।। शत्रुः १ सिमाना जोरियेका राजाको नाम ।। मित्रम् १ आफ्ना संधियार राजाका संधियारको नाम ।। परतरः राजा उदासीनः १ शत्रु राजाका शत्रुका

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः १४८८

द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः १४८९

अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः १४९०

वयस्यः स्निग्धः सवया अथ मित्रं सखा सुहृत् १४९१

सख्यं साप्तपदीनं स्यादनुरोधोऽनुवर्तनम् १४९२

यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः १४९३

चारश्च गूढपुरुषश्चाप्तप्रत्ययितौ समौ १४९४

सांवत्सरो ज्यौतिषिको दैवज्ञगणकावपि १४९५

स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि १४९६

तान्त्रिको ज्ञातसिद्धान्तः सत्री गृहपतिः समौ १४९७

लिपिकारोऽक्षरचणोऽक्षरचुञ्चुश्च लेखके १४९८

शत्रुको नाम ॥—पार्ष्णिग्राहः १ राजाका पृष्ट भागका शत्रुको नाम ॥—रिपुः, वैरी, सपत्नः, अरिः, द्विषन्, द्वेषणः, दुर्हृद्, द्विट्, विपक्षः, अहितः, अमित्रः, दस्युः, शात्रवः, शत्रुः, अभिघाती, परः, अरातिः, प्रत्यर्थी, परिपन्थी, १६ साधारण शत्रुका नाम ॥—वयस्यः, स्निग्धः, सवयाः, ३ एकै उमेरका मित्रका नाम ॥—मित्रम्, सखा, सुहृत्, ३ सामान्य मित्रका नाम ॥—सख्यम्, साप्तपदीनम्, २ मित्रता (मितेरी) का नाम ॥—अनुरोधः, अनुवर्तनम्, २ आशय बमोजिंचल्नाका नाम ॥—यथार्हवर्णः, प्रणिधिः, अपसर्पः, चरः, स्पशः, चारः, गूढपुरुषः, ७ जासूस (चीवा) खूपियाका नाम ॥—आप्तः, प्रत्ययितः, २ पत्याईयेकाका नाम ॥—सांवत्सरः, ज्यौतिषिकः, दैवज्ञः, गणकः, मौहूर्तिकः, मौहूर्तः, ज्ञानी, कार्तान्तिकः, ८ ज्योतिषीका नाम ॥—तान्त्रिकः, ज्ञातसिद्धान्तः, २ शास्त्रको सिद्धान्त (वास्तविक) कुरा जान्नेका नाम ॥ सत्री, गृहपतिः, २ सदावर्त राख्नेका नाम ॥—लिपिकारः, अक्षरचणः, अक्षरचुञ्चुः, लेखकः, ४ लेखक (लेख्ने)का नाम ॥—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लिखिताक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ १४९९
मेला मसी कालिका च स्यात्पत्राञ्जनमित्यपि ❀❀
मस्याधानी मसीपात्रं मेलान्धुर्मसिकूपिका ❀❀
मेलानन्दो वर्णतूली लेखनी पुस्तमस्त्रियाम् ❀❀
पुस्तकं पत्रकं पत्रं लेख्यपत्रं समार्थकम् ❀❀
स्यात्संदेशहरो दूतो दूत्यं तद्भावकर्मणी १५००
अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि १५०१
स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च १५०२
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च १५०३
संधिर्ना विग्रहो यानमासनं द्वैधमाश्रयः १५०४

लिखितम्, अक्षरविन्यासः, लिपिः, लिबिः, ४ लिपि (अक्षरविन्यासका) नाम ॥—मेला, मसी, कालिका, पत्राञ्जनम्, ४ मसीका नाम ॥—मस्याधानी, मसीपात्रं, मेलान्धुः, मसिकूपिका ५ मस्यानीका नाम ॥ मेलानन्दः, वर्णतूली, लेखनी, पुस्तम्, ४ कलमका नाम ॥—पुस्तकम्, पत्रकम्, २ पुस्तकका नाम ॥—पत्रम्, लेख्यपत्रम्, कार्गलः, ३ कागत (कागज) का नाम ॥—संदेशहरः, दूतः, २ दूतका नाम ॥—तद्भावे कर्मणि च दूत्यम् १ दूतका धर्म र कामको नाम ॥—अध्वनीनः, अध्वगः, अध्वन्यः, पान्थः, पथिकः, ५ पथिक (बटुवा का) नाम ॥—स्वामी, अमात्यः, सुहृत्, कोशः, राष्ट्रम्, दुर्गम्, बलम्, ७ राज्याङ्ग (राजा-मन्त्री-मित्र-खजाना-देश किल्ला-फौज) यती ७ को नाम जांन्नु प्रकृतयः ई ७ राज्याङ्गको र सामान्य रैतिको सहरवासी रैतिको पनि प्रकृति नाम ३ को हो ॥ संधिः, विग्रहः, यानम्, आसनम्, द्वैधम्, आश्रयः, ६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः १५०५
क्ष॰ः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम् १५०६
स प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम् १५०७
भेदो दण्डः साम दानमित्युपायचतुष्टयम् १५०८
साहसं तु दमो दण्डः साम सान्त्वमथो समौ १५०९
भेदोपजापावुपधा धर्माद्यैर्यत्परीक्षणम् १५१०
पञ्च त्रिष्वषडक्षीणो यस्तृतीयाद्यगोचरः १५११
विविक्तविजनच्छन्ननिःशलाकास्तथा रहः १५१२

शत्रु सित मेल गर्नु सन्धिः, १ शत्रु सित कुचोद्य गर्नु अर्थात् निऊखो नु विग्रहः, २ शत्रु माथि चढाई गर्नु यानं, ३ युक्ति बुद्धिले शत्रुसँ बचेर अड्नु, आसनम् ४ भित्रदगा दिएर गुप्त उद्योग गर्दै शत्रुसँ बनावटी मेल गर्नु द्वैधः, बलवान् शत्रुभन्दा बलवान् भयेका राजा हरू शरण परेर आफ्नु बचावट गर्नु ई ६ कर्म षट्गुण कहिन्छन्॥- प्रभावः, उत्साहः, मन्त्रजः, शक्तयः १ प्रभुशक्ति उत्साहशक्ति मन्त्रश ई ३ शक्तिको १ नाम। क्षयः, स्थानम्, वृद्धिः, १ त्रिवर्गका नाम कोशदण्डतेजोभ्यो जातः प्रतापः, प्रभावः, २ प्रतापका नाम ॥--भे दण्डः, साम, दानम्, फुट्गराउनु भेदः-ठोक्नु, दण्डः मीठो बोलेर उपा गर्नु सामः, दियेर चित्त बुझाउनु दानं ४ उपायका नाम॥-साहसम्, द दण्डः, ३ दण्ड जरिमाना कैदका नाम ॥—साम, सान्त्वम्, २ संझा बुझाउनुका नाम ॥-भेदः, उपजापः,२ भेद फुट् गराउनाका नाम। धर्मै कामैः भयेन च परीक्षणं सा उपधा १ शत्रु भित्रका गुप्त परीक्षाका नाम अथाषडक्षीणादिनिः शलाकान्ताः पञ्च शब्दाः त्रिलिङ्गमा वाच्यलिङ्ग यस्तृतीयाद्यगोचरो मन्त्रादिः, अषडक्षीणः, १ दुइ देखि तेस्राले थाहा न पाये कुराको नाम ॥— विविक्तः, विजनः, छन्नः, निःशलाकः, रहः, उपांशु,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रहश्चोपांशु चालिङ्गे रहस्यं तद्भवे त्रिषु १५१३
समौ विस्रम्भविश्वासौ भ्रेषो भ्रंशो यथोचितात् १५१४
अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम् १५१५
युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् १५१६
न्याय्यं च त्रिषु षट् संप्रधारणा तु समर्थनम् १५१७
अववादस्तु निर्देशो निदेशः शासनं च सः १५१८
शिष्टिश्चाज्ञा च संस्था तु मर्यादा धारणा स्थितिः १५१९
आगोऽपराधो मन्तुश्च समे तूद्दानबन्धने १५२०
द्विपाद्यो द्विगुणो दण्डो भागधेयः करो बलिः १६२१
घट्टादिदेयं शुल्कोऽस्त्री प्राभृतं तु प्रदेशनम् १५२२

एकान्तका नाम ॥–रहः उपांशु, इति द्वे अलिङ्गे अव्ययमाछन् । तद्भवे रहोभवे रहस्यम् १ एकान्तमा भयेका कुराको नाम । त्रिलिङ्गीछ ॥—विस्रम्भः, विश्वासः, २ विश्वासका नाम । विश्वासस्य यथोचिताद्भ्रंशः पतनं भ्रेषः १ औचित्य बाट गिर्नुको नाम ॥ अभ्रेषः, न्यायः, कल्पः, देशरूपम्, समञ्जसम्, ५ न्याय (मुनासिप) कामका नाम ॥—युक्तम्, औपयिकम्, लभ्यम्, भजमानम्, अभिनीतम्, न्याय्यम्, ६ न्याय प्राप्त र इन्साफबाट हुनुपर्ने कार्य युक्त द्रव्यादिका नाम । छशब्द त्रिलिङ्गछन् ॥—संप्रधारणा, समर्थनम्, २ उचित र अनुचित ठहराउनाका नाम ॥—अववादः, निर्देशः, निदेशः, शासनम्, शिष्टिः, आज्ञा, ६ आज्ञा-हुकुम-मर्जी (आदेश)का नाम ॥—संस्था, मर्यादा, धारणा, स्थितिः, ४ मर्यादा (स्थिति)का नाम ॥—आगः, अपराधः, मन्तुः, ३ अपराध (कसूर)का नाम । आगः सान्तछ ॥—उद्दानम्, बन्धनम्, २ बाँधनु र (कैदगर्नुका) नाम । द्विगुणो दण्डो द्विपाद्यः १ दोबर दण्डका नाम ॥—भागधेयः, करः, बलिः, ३ पोता माल पोत (तिरो)का नाम । नेतव्यानेतव्यसंबन्धी राजग्राह्यो भागः शुल्कः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

